।সূচীপত্র—

সিদ্ধান্ত স্কন্ধ — ১	সামুদ্রিকাধ্যায় — ১
সংহিতা স্কন্ধ — ২	স্বপ্নমার্তণ্ডাধ্যায় — ২
হোরা স্কন্ধ — ৩	শিবালীমিতাধ্যায় — ৩
জাতক স্কন্ধ — ৪	কালজ্ঞানাধ্যায় — ৪
প্রশ্ন স্কন্ধ — ৫	পঞ্চ প্রশ্নবিচারাধ্যায় — ৫
মিশ্র স্কন্ধ — ৬	সমস্যা প্রশ্নাবলীনির্ণয় — ৬
	দেবতা বাস নির্ণয় — ৭
	সামুদ্র লক্ষণাধ্যায় — ৮

A treatise on astrology, palmistry & allied sciences.

Hari Krishna Venkatarama

Byhadjyotisharnava —

Misra skandha,

Aurangabad, the author, no date (1898?)

अथ बृहज्ज्योतिषार्णवांतर्गते षष्ठे मिश्रस्कंधे अष्टमोध्यायः

सामुद्रिक लक्षणं प्रारभ्यते

॥श्रीगणेशायनमः॥ ॥अथसामुद्रिकलक्षणाध्यायोऽष्टमः प्रारभ्यते॥ ॥वृषवाहनविघ्नेशौशिखिवाहंसरस्वतीं॥स्व
स्थंश्रीवटुकंनत्वापितरंव्यंकटंततः॥१॥श्रीगौतमकुलोत्पन्नोज्योतिर्विद्व्यंकटात्मजः॥हरिकृष्णकरोत्यत्रसामुद्रिकविनिर्णयं॥२॥दक्षि
णेषुमहाराष्ट्रदेशेचनगरंबृहत्॥औरंगाबादसंज्ञंवैचास्तितत्रजनिर्मम॥३॥पूर्वमुक्तोमयासम्यक्राजधर्मस्सविस्तरात्॥अध्यायत्रराजनी
निस्पष्टरीत्यानिरोपिता॥४॥अधुनाचाष्टमेध्यायेसामुद्रिकविनिर्णये॥संग्रहंसाररूपंवैप्रवक्ष्यामिविशेषतः॥५॥हस्तसंजीवनंशैवंसामुद्रिकं
चलक्षणं॥वाराहोक्तंनारदोक्तं लक्षणंसुविचार्यच॥६॥अन्याचार्यमतंवीक्ष्यतथापौराणजंमतं॥सपादलक्षग्रंथस्यसाररूपोयमुच्यते॥
७॥तत्रचाद्यंप्रकरणंहस्तसंजीवनाभिधं॥रेखाविमर्शनाख्यंवैद्वितीयंचततःपरं॥८॥लक्ष्मपुरुषांगस्य-चतुर्थंस्त्रीजनस्यच॥अवशिष्टपदा-
र्थानांसंग्रहंपंचमंतथा॥९॥ ॥अथतत्रहस्तसंजीवनाख्यंप्रथमंप्रकर्णप्रारभ्यते॥ ॥आदिदेवंप्रणम्यादौसर्वज्ञंसर्वदर्शनं॥सामुद्रि
कंप्रवक्ष्यामिशुभाशुभप्रकाशकं॥१०॥समुद्रेणयतःप्रोक्तंतेनसामुद्रिकंस्मृतं॥उत्कावैकारणंनामभ्यो ऽथनिमित्तंप्रकथ्यते॥११॥अंगवि
द्यानिमित्तानामष्टानामपिगीयते॥मुख्याशुभाशुभज्ञानेनारदर्षिनिवेदिना॥१२॥अंगं १ स्वप्नः २ स्वरश्चैव ३ भौमं ४ व्यंजन ५ लक्षणे॥प्र
श्नो ६ त्पातं ७ चांतरिक्षं ८ निमित्तंस्मृतमष्टधा॥१३॥तत्रांगविद्याप्रश्नविद्याचप्रश्नस्कंधेमयानिरूपिता स्वरविद्यापितत्रैवोक्ता॥स्वप्नश्चात्रै
वमिश्रस्कंधेग्रग्रेकथयिष्ये॥त्रिविधोत्पातश्चसंहितास्कंधेमयाकथितः॥१४॥अंगविद्याद्विधाप्रोक्ताप्रश्नांगलक्षणांगका॥तत्राद्यापूर्वमेवो-
क्तालक्षणांगाइहोच्यते॥१५॥अथांगलक्षणमध्येप्रथमंहस्तलक्षणप्रशंसामाह॥हस्तसंजीवने॥ अंगेहस्तःप्रशस्तोयंशीर्षादपिविशिष्यते
साध्यंतेपाठशौचाद्याधार्मिक्येयेनसत्क्रियाः॥१६॥सर्वांगलक्षणप्रेक्षाव्याकुलानांनृणांमुदे॥श्रीसमुद्रेणमुनिनातेनहस्तःप्रकाशितः॥१७
॥दर्शनात् १ स्पर्शना २ द्वापितथारेखाविमर्शनात्॥हस्तज्ञानंत्रिधाप्रोक्तंपुरातनमहर्षिभिः॥१८॥ ॥यदुक्तंविवेकविलासे॥ ॥प्रातःप्रथ
ममेवाथस्वपाणिंदक्षिणंपुमान्॥पश्येद्वामंतुवामाक्षिनिजपुण्यप्रकाशकं॥१९॥ ॥अत्रभाष्यंयथा॥ ॥पुण्येतिकथनात्यस्माद्धस्त
नोयस्मिन्देशेयदाकालेयेनभावेनयत्शुभमशुभंवाभावितस्यहेतुपुण्यंपापंवाप्रस्तुतग्रंथबीजंप्रकाशयतिइतिभावः तदेवाह हस्तसंजीवने

हस्तेक्षणेनारभचक्रलग्नप्रेक्षादिकं दर्शनमामनंति ॥ शुभाशुभेस्पर्शनतोंगुलीनांतथाद्युमनादिनिवेदनीयं ॥२०॥ पंचांगुलिर्महादेवीश्रीसीमंधर-
शासने ॥ अधिष्ठात्रिकरस्यासौशक्तिःश्रीत्रिदशेशितुः ॥२१॥ हस्तेनपाणिग्रहणंपूजाभोजनशांतयः ॥ साध्याविपक्षविध्वंसप्रमुखाः सकलाः क्रि-
याः ॥२२॥ ॥यदुक्तं॥ ॥राज्यश्रीभवतोर्जिताथिनिवहस्त्यागैः कृतार्थीकृतः संतुष्टोस्मिग्रहाणदानमधुनातन्वनूदयांदाभिषु ॥ इत्यब्दंप्रतिबो-
ध्यपाणियुगलंश्रेयासतःकारयन् ॥ मत्यमेक्षुरसेनपूर्णमृषभः पायात्सवःश्रीजिनः ॥२३॥ मंत्राक्षराणामोंकारयेथातत्वंप्रतिष्ठितं ॥ तथासा-
मुद्रिकस्यापितत्वंहस्तेनिवेशितं ॥२४॥ राज्ञामाज्ञारहस्यस्यनिश्चयोहस्तकाद्यथा ॥ तथानिमित्ताद्देशानांनिर्णयोहस्ततःस्मृतः ॥२५॥ अ-
क्षय्याजन्मपत्रीयंब्रह्मणानिर्मितास्वयं ॥ महारेखाप्रदायस्यांयावज्जीवंव्यवस्थिताः ॥२६॥ नास्तिहस्तात्परंज्ञानंत्रैलोक्येसचराचरे ॥ तद्ब्रा-
ह्म्यापुस्तकंहस्तेधृतंबोधायजन्मिनां ॥२७॥ तीर्थंकराणांप्रतिमाहस्तन्यस्तदृशोऽखिला ॥ तद्धस्तदर्शनान्नान्यत्केवलज्ञानसाधनं ॥२८॥ सा-
मुद्रिकोबोधिपयोनिपीयमेघोरसंवर्षतिमृष्टमूर्व्यां ॥ समेधतांनेनसुरत्नेनलोकःपाणिस्थितंजीवनमेतदाप्य ॥२९॥ ॥अथहस्तदर्शनेपुण्य-
साधनहेतुंतीर्थानिचाह ॥ ॥मुलेंगुष्टस्यस्याद्ब्राह्म्यंतीर्थंकायकनिष्टयोः पित्र्यंतर्जन्यंगुष्टांतर्देवतंत्वंगुलीमुखे ॥३०॥ शत्रुंजयस्तत्तर्जन्यांम-
ध्यायामुज्जयंतकः ॥ अर्बुदःखलुसाविन्यांकनिष्टायांसमेतकः ॥३१॥ अंगुष्टेअष्टापदगिरिः पंचतीर्थान्यनुक्रमात् ॥ स्वहस्तदर्शनैवंद्यंनेमा-
तरुत्तमैः ॥३२॥ विंशोपकाविंशजिनाअंगुष्टादाद्यतीर्थपान् ॥ मत्यगदक्षिणपूर्वोदिक्तलशेषाच्चतर्जनी ॥३३॥ पितृरेखाभवेद्गंगामातृरेखासर-
स्वती ॥ आयुरेखात्रयमुनातत्संगस्तीर्थमुत्तमं ॥३४॥ ॥अथकरमध्येदेवतामंत्राश्च ॥ ॥अंगुष्टादिःपंचपदीनमस्कारस्यचिंत्यते ॥ चतुः
पदीचूलिकायाश्चतुर्दिक्षुतलेस्मृता ॥३५॥ एवंसर्वप्रमंत्रेषुदेवताराधनेस्मृतः ॥ करन्यासस्तेनदेवाःसदासान्निध्यकारिणः ॥३६॥ हस्तद्वयायूरे-
खांतंयोजनेप्रातरुन्मुखैः ॥ मत्याख्यानस्यसमयेध्येयासिद्धशिलाबुधैः ॥३७॥ तलंसिंहासनंसाक्षात्तत्रस्थस्त्रिजगद्गुरुः ॥ आदिदवोंगुलः से-
व्योजयादिदेवताजनैः ॥३८॥ नंजियेधिजयेस्वाहाजयंतेऽप्यपराजितेर्दुष्ट्यादिदेवायनमएवंन्यासोपिचिंत्यते ॥३९॥ अंइत्यर्हन्देवदेवोविश्वं-
भरःपरापरः ॥ गुरुर्गुशब्देनाख्यातस्तत्स्थोधर्मस्तदीरितः ॥४०॥ भक्त्यादेवगुरोर्ध्यायेत्तस्मात्तत्वत्रयंकरे ॥ लीनिलक्ष्मीश्चतुर्द्धापिस्यादस्या

राधकांगिनः॥४१॥यथोदयगिरेःशृंगेप्रागेऽभ्युदयतेरविः॥तथांगुष्टेयहाःज्ञेयाःनखाश्चंद्रमुखाःपरे॥४२॥ ॥अथहस्तदर्शनोपयोगिमंत्राः॥
ॐकारमादित्यमुखेवाग्बीजंतारकानने॥ह्रींबीजंभगवत्यंगेश्रीसौभाग्यवतीस्थितं॥४३॥क्लींकारंतुप्रदेशिन्यांचतुर्दिक्षुतलेपुनः॥अर्हंनमोनमः
सिद्धंवर्णाष्टकमिदंजपेत्॥४४॥ततोहस्तंनिरीक्षेतजानीयात्तेननिश्चितं॥जायतेवचनेसिद्धिःसिद्धदेवगुरोःस्मृतेः॥४५॥अकारइतिमध्येऽर्हन्आ-
काराद्यास्त्रयोदश॥ अंअइत्यंगुलीपंचदशभागेषुचस्मरेत्॥४६॥श्रीपार्श्वोवामहस्तोयंफणाःशाखास्तदीयकाः॥श्रीनाभेयोदक्षिणश्चकरःशाखा-
जटाधराः॥४७॥विष्णुर्देवोत्रवामस्थःकेकिपिछकिरीटभृत्॥नाथःशिवोदक्षिणस्थःतस्यशाखाजटाघटा॥४८॥तयोर्योगेयथोकारःपरमंमंगलं
भवेत्॥तथांजलिविधानेनसर्वदासर्वमंगलं॥४९॥ऊंहरहूंहः ऊंसरसुंसः क्रमतः पंचांगुलीषुराजमुखात्न्यासोयंअहस्तेस्थाप्यंतत्सर्वतोभद्रं॥५०
॥भाष्यंस्पर्शनेअस्यउपयोगः॥ ॥अथनाममालाकथ्यते॥ ॥अथतत्रप्रथमंहस्तनामानि॥ ॥हस्तःकरःशमःपाणिःशयः पंचांगुलिःस
लः॥ पंचशाखः पंचशिखःपंचाननोवरप्रदः॥५१॥महाब्रह्मानंतवीर्योमहादेवश्चसिद्धिदः॥सिंहासनः शक्तिशालीमहावीरःसुरायुगं॥५२॥ ॥
अथअंगुष्टनामानि॥ ॥अंगुष्टश्चांगुलोहंसःशिवोराजावनुःप्रियः॥भोगीगणपतिर्विष्णुर्मेरुःसूर्योऽक्षयोवटः॥५३॥ अथअंगुलीमात्र
नामानि अंगुल्यःकरशाखास्ताअंगुर्यः करपल्लवाः॥ त्रिपुराकरशाखाश्चमायाः कामदुघामताः॥५४॥मायाग्रहेयथायोगमंगुष्टःकनिष्ठुच्य
ते॥पंचशाखःकरस्तस्यांगुलीशाखेतिसूत्रणात्॥५५॥ ॥अथतर्जनीनामानि॥ ॥प्रदेशिनीतर्जनीस्याछत्रुहाद्यागवेषिणी अथमध्यां-
गुलिना ज्येष्टातुमध्यमामध्यालक्ष्मीःसौभाग्यवत्यपि॥५६॥ अथअनामिकाना॥ अनामिकाचसावित्रीगौरीभगवतीशिवा॥ अथ
कनिष्टाना॥ कनीनिकाकनिष्टांत्यालघुस्साराचकांचनी॥५७॥अथपर्वनामानिविशोपकाग्रंथिपर्वस्थानभागांशसंधयः अथअंगुष्टमूलना
कंदोनृपासनंपीठंगरुडोंगुष्टमूलके॥५८॥ अथमणिबंधना हस्तस्यादिर्मणिबंधोमणिरत्नाकरोऽपिच॥ अथकरभना करभोऽस्मादा-
कनिष्टमुष्टोवक्रोऽस्तभूधरः॥५९॥ अथहस्तपृष्टनामानि अवहस्तोहस्तपृष्टंतमःशून्यंधियन्निशा॥ अथहस्ततलना प्रहस्तस्ता-
लिकातालस्तलंभूतलगर्भकौ॥६०॥ अथनखनामानि पुनर्भवोभुजाकंटः करसूकःपुनर्नवः॥कामांकुशोमहाराजः करजोनखरोनखः॥६१

करपुष्पंरत्नकांतिःशत्रुघ्नःकरदीपकः अथपितृरेखाना· पितागोत्रंबलंमूलंवक्षोधर्मोमनोधृतिः॥६२॥ अथमातृरेखाना माताधनंसुखंको
शःसाहसंपालिकारानिः॥ अथायुष्यरेखाना॥ आयुःस्याज्जीवितंतेजःस्वभावस्वप्नभातनुः॥६३॥ अथांगुलीमूलनामानि प्रदेशिन्यादिमूला
निनामन्तोप्यर्थनोपिच॥ कलहो१राज्य२मैश्वर्य३यशोनुक्रमतो४मतं॥६४॥ अथप्रादेशनामानि प्रदेशन्यादिभिःसार्द्धमंगुष्टेविनतीकृते
प्रादेश१ताल२गोकर्ण३वितस्तय४उदाहृताः॥६५॥ ॥इतिनाममाला॥ ॥अथहस्तावलोकनविधिः॥ ॥तत्रादौपृच्छकलक्षणं॥ ॥
प्रातःशुचिकृतस्नानोदेवानभ्यर्च्यसादरं॥सुगंधद्रव्यैःपुष्पैश्चनैवेद्यैर्विविधैस्तथैः॥६६॥गुरूनत्वोपदेशंचकृत्वाधर्मस्यतत्ववित्॥प्रीति
लाभान्नपानाद्यैर्विधिनाभुक्तभोजनः॥६७॥सुवेषश्चिंतयाहीनःसमधातुर्जितेंद्रियः॥हस्तेश्रीफलपुष्पाद्यैःप्रपूर्यविनयान्वितः॥६८॥ह
स्तभेसद्गुरोःपार्श्वेस्वंहस्तंदर्शयेत्सुधीः॥निर्दंभःशृणुयात्सर्वंश्रद्धयास्वगुरुणोदितं॥६९॥जितेंद्रियस्यश्रद्धालोर्यत्फलंकथ्यतेबुधैः॥स्वप्नवज्जा
यतेसत्यंतत्सर्वंनान्यथापुनः॥७०॥ अथगुरुलक्षणं ब्रह्मचारीक्षमाशीलःकृतज्ञोधार्मिकःशुचिः॥दक्षोगुरुक्रमायातोवाक्सिद्धःस्व-
क्रियारतः॥७१॥संतुष्टःश्रद्धयायुक्तःतपस्वीविजितेंद्रियः॥नानाशास्त्रविवेकज्ञःस्थिरचित्तोगुरुर्मतः॥७२॥कुलंजातिंतथादेशमाकारान्
जन्मजान्ग्रहान्॥धर्मश्रद्धांचविज्ञायसमयज्ञःफलंवदेत्॥७३॥गुरुःपद्मासनासीनोवाङ्मयंहस्तजीवनं॥संपूज्यसंस्मरन्स्वेष्टंदेवंगुरुंव
देत्फलं॥७४॥ ॥अथहस्तावलोकनोपयोगिकालवामदक्षिणकरादिकिंचिन्निर्णयः॥ ॥दिनेचैकस्यपुंसोवाह्वोर्हस्तंविलोकयेत्॥ह
स्तंस्वदक्षिणेहस्तेन्यस्यावहितमानसः॥७५॥रात्रौदीपंपुरस्कृत्यसंपूज्यैनंयथाविधि॥स्त्रियावामकरंवामेस्वहस्तेन्यस्यवीक्षते॥७६॥
योनरःस्त्रीप्रकृतिकःतत्करोवीक्ष्यतेबुधैः॥मध्यान्हात्परतःस्त्रीणांनृस्वभावेनिशीयतः॥७७॥दक्षिणाद्बलवान्वामःपुंसस्त्रीशीलशा-
लिनः॥नृशीलयास्त्रियावामाद्दक्षिणोबलवान्भवेत्॥७८॥स्त्रीमातृमातृपक्षादिगृहंक्षेत्रंचवाटिका॥पुंसांवामकराद्वीक्ष्यंराशिभिःशुक्लश्चप-
क्षकः॥७९॥पत्युःसुखंपितुःपक्षंधर्मंगोधनमार्जवं॥कृष्णपक्षंदिनंस्त्रीणांवीक्ष्यंदक्षिणपाणितः॥८०॥ ॥अत्रविशेषःरेखाविमर्षणेपि
ज्ञेयः॥ यजमानैःफलंश्रुत्वागुरोस्तथेत्युदीरयन्॥निरीक्ष्यनाणकंरौप्यंस्वव्यवहारंसमाचरेत्॥८१॥इत्येवंविधिनागुरुर्गुरुभक्तिः पंचांगु

लिंवीक्षते ॥ वश्यंतस्यभवेदयश्यमचिराल्लोकत्रयंसद्गुणैः ॥ वृष्टिःस्वर्णमयीचमेघविजयात्संजायतेतद्गृहे ॥ मौलौमाल्समिवास्यशासनमहो-
भूमीभुजोबिभ्रति ॥ ८२ ॥ ॥ इतिहस्तावलोकनविधिः ॥ ॥ अथतिथिवारनक्षत्रयोगकर्णगंधरसस्पर्शाकारादिनाअंगुलादिस्वरूपकथ
नंप्रारभ्यते ॥ ॥ तत्रादौतिथिदर्शनं ॥ ॥ नंदाभद्राजयारिक्तापूर्णास्युस्तिथयः क्रमात् ॥ ताराद्याः कृष्णपक्षेतद्दर्शेसूर्येंदुसंगमः ॥ ८३ ॥ य-
स्यांनिरीक्ष्यतेहस्तः सातिथिः नदिनोदये ॥ घटीचतुष्टयंशेषास्तदनुक्रमतोमता ॥ ८४ ॥ हस्तवीक्षणवेलायांयातिथिःसमुदीर्यते ॥ तदंगुल्यास्त
रूपेणवाच्यंसर्वंशुभाशुभं ॥ ८५ ॥ तारादित्र्यंशकेज्ञेयाप्रतिपत् १ षष्ठिका ६ तिथिः एकादशीच ११ क्रमतः शेषंशेषास्त्ववस्थितं ॥ ८६ ॥ अत्रसु-
खावबोधायकिंचिद्भाष्यंयथा ॥ ॥ संवत १७३७ वर्षेआषाढसितद्वितीयातिथौ ॥ भृगुवासरेपुष्यनक्षत्रेदिनोदयात्सप्तघटीसमयेहस्तवीक्ष
णेप्राप्तातृतीयातिथिः ॥ साचमध्यायामूलतः प्रथमत्रिभागेतेनहस्तस्वामिनोवैश्येभ्योलभ्यं उत्तरदिशोलभ्यं ॥ लक्ष्म्यांगुरुरितिवक्ष्यमाण
त्वात् सुवर्णधातोर्लभ्यमितिवाच्यं एवंतिथिफलंज्ञेयंत्रिपुरांशस्यदर्शनात् ॥ जाति १ दिग् २ द्रव्य ३ राश्यादे ४ र्लभ्यालभ्यप्रबुद्धये ॥ ८७ ॥ ॥
भाष्यंयथा ॥ ॥ यदिमध्यायाः प्रथमेंशेऊर्ध्वरेखादिशुभंलक्षणंतदातेभ्योलभ्यंनचेदलभ्यमितिभावः ॥ ब्राह्मणी १ क्षत्रिया २ वैश्या ३ शूद्राः
स्युः ४ करपल्लवाः ॥ कनीनिकाद्याहस्तोपियोगवान्वर्णवर्जितः ॥ ८८ ॥ तर्जनीप्राग् १ उदक्मध्या २ पश्चिमाकांचनी ३ मता ॥ दक्षिणानामिका ४
मेरुर्मध्यदेशः ५ प्रकीर्तितः ॥ ८९ ॥ धातुर्मूलंतथाजीवंरूप्यंशकेविषमांगुलेः ॥ समायाःखलुमायायाःजीवोमूलंचधातवः ॥ ९० ॥ धातौप्राप्तेयदंगु
ल्यांयोग्रहस्तस्यधातवः ॥ सीसकंभोगिनोमूलेमध्येताम्रंरविस्थिते ॥ ९१ ॥ मूर्छितास्त्वंद्रचारात्ग्रहाणांसप्तधातवः ॥ ताम्रं १ तारं २ रीति ३ नागं
४ हेमं ५ वंगं ६ च तीक्ष्णकं ॥ ९२ ॥ कास्यकं ८ वृत्तलोहंच ९ राहोःकेतोश्चयत्स्मृतं ॥ ताराद्वितीयत्र्यंशेतत्मध्यायावृत्तलोहकं ॥ ९३ ॥ मूलेमू-
लंशनौराहौपत्रंशुक्रेकुजेगुरौ ॥ फलंचचंद्रभानुभ्यांशेषेपुष्पंविनिर्दिशेत् ॥ ९४ ॥ एवंजीवेपिसंप्राप्तेग्रहैर्वाच्योऽस्यनिर्णयः ॥ चंद्रेदेवाश्च
तिर्यंचकुजेदैत्याःशनौस्त्रियौ ॥ ९५ ॥ राहौस्त्रिथौनारकाःस्युःशेषेषुमनुजाःस्मृताः ॥ मनुष्येप्यथसंप्राप्तेपंचमायालघोःक्रमात् ॥ ९६ ॥ बालं
कुमारंतरुणंपक्वंवृद्धंविचिंतयेत् ॥ इत्यादिशेषेसर्वस्यादत्रचूडामणावित्र ॥ ९७ ॥ कस्यपार्श्वेथवाग्रामेकस्मिन्मेलभ्यसंभवः ॥ इतिप्रश्नेंगु-

लाभागाः मेषाद्यो द्वादशोदिताः ॥९८॥ कांचन्याः प्रथमस्त्र्यंशो मेषो वृषो द्वितीयके ॥ एवंयत्रक्रमे हस्तप्रेक्षा तिथिरुपागता ॥९९॥ ततो लभ्यम
लभ्यंवा स्वराशिपरिमेलकात् ॥ ज्ञेयं कर्कत्रयं मेरोर्नखमध्यांतपर्वसु ॥१००॥ भाष्यं यथा ॥ अत्रोदाहरणे मध्यायाः प्रथमविशोपके तुलाराशिः ॥ न
त्र शुभलक्षणे लभ्यं अशुभे त्वन्यथा यद्वा हस्तस्वामिनो राशिमेलकाल्लभ्यमलभ्यं वा ज्ञेयं इति धातुमूलजीवचिंताप्रश्ने तिथिदर्शननिर्णयः ॥
॥ अथ वारदर्शनं ॥ रविरंगुष्ठमध्यस्थस्तत्रैव चंद्रमाः स्फुटः ॥ मंगलस्तर्जनीशीर्षे नृपासनगतो बुधः ॥१॥ लक्ष्म्यां गुरुः कविर्गौर्य्यां कनिष्ठायां श
निमतः ॥ हस्तपृष्ठे राहुकेतू स्वंवारास्तथा ग्रहाः ॥२॥ दिनोदयोस्मृतोंगुष्ठे मध्याह्नं मध्यमांगुली ॥ संध्या तारा ततो रात्रिर्हस्तपृष्ठे व्यवस्थिता ॥३॥ दि
नं हस्ततलं बोध्यम वहस्तस्तमस्विनी ॥ दिवसो दक्षिणे हस्तो रात्रिर्वामो मनांतरे ॥४॥ छायासुतः शनिर्लोके वायुरूपो विधुंतुदः ॥ तद्राशिचारेता
राया द्वितीये त्र्यंशके ध्रुवः ॥१०५॥ सस्मात्सप्तमगः केतुरिति मध्यांगुली भवेत् ॥ द्वितीयभागे नियतः प्रोक्तो लाक्षणिकैर्बुधैः ॥६॥ हस्तेक्षण
दिने वारः प्रातस्तस्योदयः क्रमात् ॥ समये हस्तवीक्षायायः प्राप्तोऽस्यांगुलिः स्मृतः ॥७॥ एकोयामश्चतुस्त्रिंशत् पलान्यथाक्षराणि च ॥ त्यष्टि
मानेन संज्ञेयो वारभोगो विचक्षणैः ॥८॥ तद्वारस्य तदंगुल्याः स्वरूपेण शुभाशुभे ॥ स्वराशिनाथमैत्र्यादिज्योतिः शास्त्रविमर्शनात् ॥९॥
भाष्यं तद्वारेण स्वराशिनाथमैत्र्यां तदंगुल्यां शुभलक्षणे पूर्णं फलं वैरे पादमात्रं साम्ये त्वर्द्धं राशिचक्रे वारगृहस्य शुभदृष्टौ पादोनं फलं एव
मशुभलक्षणेऽपि ॥ उदाहरणे सप्तमघट्यां हस्तविलोकनं तद्दिने शुक्रवारश्चौदयिकः तस्यांगुली अनामिका तेन तस्याः स्वरूपचिंतनात् शु
भाशुभज्ञानं ॥ यद्वा हस्तेक्षणे वारः सविष्णावूर्ध्वलोकगः ॥ शेषास्तले मर्त्यलोके तर्जन्याद्यासु दिग्गताः ॥१०॥ अधोलोके चावहस्ते फलमे
षामिहोदितं ॥ यत्र स्वराशेर्नाथः स्यात् संपूर्णं तद्भवं फलं ॥११॥ इति चिंतायाः शुभाशुभफलज्ञानप्रश्ने वारदर्शननिर्णयः ॥ ॥ अथ नक्ष
त्रदर्शनं ॥ त्रीणि त्रीणि तले दिक्षु मध्ये नक्षत्रमेककं ॥ नारादिपंचशाखासु प्रत्येकं स्यात्त्रयं त्रयं ॥१२॥ वीक्ष्यते यत्र नक्षत्रे हस्तस्तद्भर्भकस्थितं
॥ ततः प्रागुदक्षिणावारुण्युत्तरासु त्रयं त्रयं ॥१३॥ कांचन्यादेः पंचदशा भानि यत्रात्मनामभं ॥ तत्फलं पूर्णरादेश्यं स्थानरेखादियोग्यतः ॥१४॥
या अंगुल्याः प्रथमपर्वणि नक्षत्रद्वयं मध्यपर्वणि नक्षत्रत्रयं ऊर्ध्वपर्वणि नक्षत्रद्वयं एवं सप्तनक्षत्राणि स्थूलावगत्या सूक्ष्मतया ॥१४ घटयः पर्वप्र

तियोज्येत्यर्थः ॥ इतिनक्षत्रदर्शननिर्णयः ॥ अथवर्षेषुशुभाशुभज्ञानायसामान्यतोराश्युपरिग्रहदर्शनं ॥ जागर्तियेननाम्नायस्तद्राशिर्य
त्रपर्वणि ॥ तारेदेर्मेषराश्यादिस्ततआरभ्यगण्यते ॥ १५ ॥ ज्ञेयास्तन्वादयोभावास्ततोद्वादशलग्नजाः ॥ तेषूर्ध्वरेखासशुभोग्रहः क्रूरस्तथोन्य
था ॥ १६ ॥ अश्विन्यादीनिधिष्ण्यानि प्रत्येकं सम्प्रयोजयेत् ॥ कनीनिकातः प्रारभ्ययत्रहस्तेक्षणस्यभं ॥ १७ ॥ प्रामंपृष्टुः सराशिः स्यात्मेषादि
र्व्यंशकः क्रमात् ॥ चंद्रस्तत्रैवविन्यस्यचतस्रष्वंगुलीष्वपि ॥ १८ ॥ जागरूको जनोयेनराशिना जायते सदा ॥ नाराद्यांशाच्चमेषादेर्यत्रतल्लग्न
मालिखेत् ॥ १९ ॥ तत्रग्रहास्तुप्रागुक्तास्थानस्थाः स्वमनीषया ॥ स्थाप्याः संहारमार्गेण विचार्यतच्छुभाशुभं ॥ २० ॥ संहारमार्गेणवामावर्तेन
अत्रभाष्यं ॥ यथाकेनचिन्मेषराशिनापुरुषेणहस्तोदर्शितः पृष्टंचममकेषुकेषुवर्षेषुशुभमशुभंवाभावीनितदानस्यराशिर्मेषस्तल्लग्नंतत्कनि
ष्ठाप्रथमत्रिभागेतेनसूर्योगुष्ठद्वितीयत्र्यंशोस्थितत्वात्लग्नात्पश्चाद्राशौ एकादशभवनस्थः ॥ यतउक्तं ॥ रविरंगुष्ठमध्यांशेनंराश्यादिविमर्श
ने ॥ आद्याद्वितीयभागस्थंकृत्वासर्वंविलोकयेत् ॥ १ ॥ तथातद्दिनेअश्विनीनक्षत्रंतेनचंद्रोमूर्तिभवनेचंद्रन्यासः प्रायः तिथिपत्रापेक्षयैवजाय
ते ॥ अश्विन्यादीनिऋक्षाणिइत्यादिचंद्रचक्रं भग्यंतरेणसामुद्रिकत्वात् ॥ ततएवकृत्तिकायाविंशघटिकायावत्मेषेचंद्रोदयो ज्योतिष्येतुपंच
दशघटियावदिति विशेषः ॥ मंगलः तर्जन्यामुखेनलग्नाद्द्वादशस्थानेतेनद्वादशोभौमः ॥ बुधस्तुयस्यांगुलेतच्चेत्प्रथमत्र्यंशेतदासूर्येणमिलि
तएवभवति ॥ यदाद्वितीयभागेलग्नंतदासूर्यात्द्वितीयराशौपृष्टेबुधः स्यात् यदातृतीयभागेलग्नंतदासूर्यात्द्वितीयराशौ अग्रेबुधः ॥ अत्रतुक
निष्ठाप्रथमत्र्यंशेलग्नंतदासूर्येणमिलितएवलग्नादेकादशोबुधः ॥ गुरुः मध्यमुखेनर्हिलग्नान्नवमेधनुराशौ ॥ शुक्रोपांगुल्याः प्रथमभागेल
ग्नेसतिसूर्येणमिलितएवस्यात् द्वितीयभागेलग्नेसतिसूर्यात्द्वितीयराशौस्यात् तृतीयभागेलग्नेसतिसूर्यात्तृतीयराशौतत्रापिकनिष्ठादिक्र
मात् समांगुलेलग्नेसतिसूर्यात् शुक्रः पश्चाद्राशिषु विषमांगुलेलग्नेसति सूर्यादग्रिमराशौ प्रदेयः अत्रतुलग्नस्य विषमांगुलिप्रथमत्र्यंशस्थ
त्वात् मिलितएवसूर्येणशुक्रः ॥ तथाशनिः कनिष्ठायास्तृतीयत्र्यंशस्थत्वात् तृतीयभवनेराहुः कनिष्ठायास्तृतीयत्र्यंशेस्थितस्तेनलग्नात्
द्वितीयभवनेकेतुस्तुराहोः सप्तमगइस्युक्तत्वाद्वृश्चिकेसप्तमः ॥ इतिराश्युपरिग्रहदर्शनं ॥ स्थापनयथा ॥ रविः कुजोगुरुर्मंदोराहुश्चैतेध्रुवाग्र

द्राः॥ राशीशशिसुतः शुक्रः चलादेयाविमृश्यते॥१२१॥ वर्षद्वादशकेचारोध्रुवाणामपिजायते॥ मूलाग्रराशौतेदेयाराहुर्मूलाच्चपृष्ठत
॥१२२॥ एतत्सर्वेनष्टजातकानुसारेणवर्षफलोपयोगीत्रिपताकाचक्रानुसारेणोक्तं॥ अथफलविचारेलग्नपतिर्यदिलग्नेइत्यादिभद्रबा
हुसंहितोक्तं ज्ञेयं यद्वा तनुस्थोरविस्तुंगयाष्टिंविधत्ते॥ इत्यादियवनजातकोक्तापद्मकोशोक्तावाभावाविचार्यंतेनपुनः राशिविचारद्वादशव
र्षाणियावद्धस्तस्यसर्वेषामेकत्वात् मतांतरेण पुनर्वर्षशुभाशुभज्ञानं॥ कस्मिन्वर्षेशुभंकस्मिन्नशुभंवाभवेन्मम॥ इतिज्ञेयंपंचदशासमा
ध्यंचांगुलीभवाम्॥२३॥ अथवामहस्तस्यराशि   कुंडलीरूपत्वान्मेषादिद्वादशवर्षेषुकुंडली चक्रेषुचंद्रस्थानमेववामहस्तांगु
लीत्र्यंशेपुनर्नद्राशिभागेदत्वाभावाविचार्याः यथामेषराशिकस्यवर्षचक्रं तदेवचक्रेषुचन्द्रराशिचक्रंतद्दिनेमेषएवचंद्रे चंद्राद्ग्रहादि
न्यासोयथावृषराशिकमेषचंद्रदिनेराशिकुंडलिकाचक्रंकनिष्ठाद्वितीयांशेवृषस्थानत्वात्तत्र चंद्रराशिर्मेषोदयेदत्वाग्रहन्यासः दशमेर
विरेकादशेकुजोद्वितीयेशनिः बाहुमूर्तौबुधोद्वितीयांशत्वात्सृष्टेनवमः अष्टमेगुरुः शुक्रोविषमांगुलीद्वितीयांशत्वात्सूर्यादग्रेएकाद
शइति एवंमिथुनेकर्कटकेइति मिथुनराशिकमेषचंद्रेराशिचक्रं कर्कराशिकस्यच एवंसिंहादिमीनांतेषुचंद्रराशिचक्राणिज्ञेयानि
परंवामहस्तेरेखादिविचारणयापूर्णमपूर्णंवाफलंवाच्यं॥ वीक्ष्यहस्तेषुयारेखाऊर्ध्वे चक्रंयवोऽथवा॥ तस्मिन्वर्षेशुभंलक्ष्मीः पुत्रा
द्याप्तिर्यशः स्फुरत्॥२४॥ तेषुयत्रायतारेखाछिन्नाभिन्नाचवेधयुक्॥ शुक्तिश्चतुष्किकाबिंदुस्तद्वर्षेदुःखदायकं॥२५॥ व्यवस्था
प्यादिभंवर्षकानीनिकाद्यपर्वणि॥ विचार्यंतेपंचदशवर्षाणिदक्षिणेकरं॥२६॥ ततोवामेपंचदशपुनर्दक्षिणवामयोः॥ स्त्रियावा
मेऽपसव्येचविमृश्यंतेऽत्रतक्रमात्॥२७॥ पुनर्मतांतरेणवर्षशुभाशुभज्ञानं॥ यद्वाहस्तेक्षणे जन्मलग्नद्वादशभावतः॥ शुभाशुभानिवर्षा
णिपविज्ञेयानिपुनःपुनः॥२८॥ तत्करणंत्वेवंद्रष्टव्यं प्रत्येकंजन्मलग्नस्यनिर्णयार्थंकरेक्षणे॥ स्वराशिवर्षसंयुक्तं कृत्वासूर्यैर्विभाजयेत्॥२९॥
यच्छेषंस्थानकानस्माभिजराश्यादिकःक्रमः॥ स्थाप्यतत्रग्रहादेयाः प्रागुक्तस्थानयुक्तितः॥३०॥ भाष्यं यथाकेनचिन्मेषराशिकेनकरोदर्शि
तःसपंचवार्षिकः मेषराशिरेकः राकांकमीलनेषट्तेनषष्ठः स्थानमनामिकायाअंत्यं पर्वतत्रस्वराशिंमेषंव्यवस्थाप्यगण्यते एवंकश्चित्सो

ङशावार्षिकः पुमान्वृषराशिर्द्द्यमेलनेनाष्टादश अस्यद्वादशभागशेषंषट्ततोऽनामिकांसर्वणिवृषंस्वराशिंव्यवस्थाव्यगण्यं एवंप्रष्टुर्जन्मल
ग्ननिर्णयः अत्रमेषराशिकस्यजन्मलग्नस्थापनंयथा अत्रप्रश्नदिनभस्वातिस्तचंद्रंचक्रानुसारेणमध्यमायात्रआद्यत्र्यंशस्थानीयमत्रमध्यमा
या आद्यत्र्यंशोवृषराशिः प्राप्तः अनामिकांपर्वणिमेषन्यासाद्धृदेचंद्रः शेषंप्राग्वत् ॥इतिवर्षदर्शनं॥ श्रावणोहस्ततालस्यादंगुष्ठोभाद्रपन्मतः
आश्विनस्तर्जनीमध्यः कार्तिकः श्रीविधामता॥३१॥ मार्गशीर्षोऽनामिकायां पौषोदक्षकनिष्ठिका॥ वामेमाघः कनिष्ठायां फाल्गुनेऽनामिका
मता॥३२॥ मध्येचैत्रोप्रदेशिन्यांमाधवोंऽगुष्ठकेऽपरः॥ आषाढः भूतलंप्राप्तः स्यादेवंचोत्तरायणं॥३३॥ वर्तमानोहियोमासः प्राप्तोसौपंचनाडि
कः॥ततोहस्तेक्षणघटीमासस्तस्यशुभाशुभं॥३४॥ रेखाकामदुघारूपाद्वाच्यंलक्षणशिक्षितैः॥तर्जन्यांचकनिष्ठायां प्राप्तोमासस्तुसोशु
भः॥३५॥ शेषस्थानेशुभोंगुष्ठेरणप्रश्नेऽग्निभंगदः॥तर्जन्यांधनदःसोऽपितलस्थः क्वापिनोशुभः॥३६॥ लक्ष्मीस्थिरोधनकरोमेरुस्थः पद्दाय
कः॥ यद्वामाघादयोमासाद्वादशापितलद्योः क्रमात्॥३७॥ दिनोदयात्संचघटीमानोपाणीक्षणावधियोमासः प्राप्यतेतस्मिंस्थानलक्षणवीणा
न्॥३८॥ मासेशुभाशुभंवाच्यमित्यर्क्तं ज्ञानिभिः पुरा॥३९॥ इतिमासदर्शनं॥ ॥कृष्णपक्षोदक्षिणःस्यात्करस्तादितरःसितः॥यत्पक्षेद्दर्श
येद्धस्तंसमुख्योन्यस्तदन्यथा॥४१॥ भाष्यं॥ कृष्णपक्षेजन्मज्ञानेबाहस्तदर्शनेवास्पर्शनेगोत्रधनायुरादिविचारः॥ सर्वोपिदक्षिणहस्तान्मु
ख्यतयावाच्यंशुक्लपक्षेतुवामहस्तात् नचेदेवंस्यात्तदावामहस्तेरेखावैफल्यप्रसंगः इदंचसामान्यतो विशेषतस्तुपुरुषादिकृतः इतिपक्षदर्शनं॥
यद्दिनेवीक्ष्यतेहस्तस्तत्तिथेःस्थानकान्निजान् आरभ्यगणनेवाच्यादिवसास्तेशुभाशुभाः॥४२॥ अंगुल्यान्तर्गतादुष्टरेखास्थानास्थिता
अपि॥दुष्टाःश्रेष्ठास्तथान्येवै मिश्राःप्रादेशिनीगताः॥४३॥ रणार्थेन्तेऽपिनशुभाअंगुष्ठस्थास्तुभंगदा॥रोगप्रश्नेशांतिकादौश्रेष्ठास्ते
ऽनामिकागताः॥४४॥ मध्यगनाधनकरालाभसाम्राज्यदायकाः॥४५॥ इतिदिनदर्शनं॥ काघटीकीदृशीमेस्यादितिज्ञेयकरेक्षणे॥
यातिथीस्तांनिजस्थानेदत्वासर्वंविलोकयेत्॥४६॥ प्रातस्त्यंघटिकायुग्मंतिथेःस्थानेनियोजयेत्॥ तदनुक्रमतःपंचदशभागान्विचा
रयेत्॥४७॥ तुल्येनक्तंदिनेतेषंक्रमोमेषतुलारवौ॥न्यूनेऽधिकेघटीयुग्मे पलैर्ज्ञेयाधिकोन्नता॥४८॥ घटीनांपलमित्येवंदिवसस्य

निबंधते॥ रात्रौघटीपुनर्वाच्यावामहस्तंविलोकनात्॥४९॥इतिघटीदर्शनं॥ अश्विन्यादिक्रमाद्यत्रताराद्यंगुलिपंचके॥ दिनभंहस्त
वीक्ष्यायाः प्रातस्तद्गृहजादशा॥५०॥ अंगुष्ठेऽपिकनिष्ठायांषट्‌ऋक्षाणिनियोजयेत्॥शेषासुपंचऋक्षाणिदशान्चक्रमिनीरितं॥५१॥
सार्धसप्तघटीमानंदशानुक्रमतःकरौ॥ यदावीक्ष्येतसाज्ञेयाप्रष्टुर्जन्मदशाबुधैः॥५२॥ आ चं भौ बु शजीरा श्र क्रमेणासांप्रचारणा
॥स्थानयोगाद्दशाज्ञेयाशुभाशुभमिहेष्यते॥५३॥इतिदशादर्शनं॥ ॥अथदिनलग्नदर्शनं॥ पाणिर्यद्द्दासरेवीक्ष्यस्तत्संक्रांतिर्दिनो
दये॥ दंयान्होमानयोगेनतदनुक्रमतःपुनः॥५४॥शक्तिशालीक्षणेप्राप्तंलग्नंसम्यग्विचारयेत्॥स्थानयोगाद्गृहन्यासात्तत्रवाच्यंशुभ
भाशुभं॥५५॥ कनिष्ठाद्यत्रिभागाच्चमृगादिरविसंक्रमं॥ प्रारभ्यदिनसंक्रांतिर्यत्रलग्नक्रमस्ततः॥५६॥लग्नप्रमाणमुत्कृष्टदिनेसा
र्द्धेषुनाडिकाः॥घट्यश्चतस्त्रोवैविंशपल्लानिदिवसे१४ल्पके॥५७॥भाव्यं॥मेषसंक्रांतिमध्येप्रातर्घटीत्रयमध्येकेनचित्पाणिर्दर्शि
तस्तदाऔदयिकंमेषलग्नमेवागतंतच्चकनिष्ठादौमृगादिक्रमादनामिकायाःप्रथमत्रिभागेस्थितं॥तत्रकनिष्ठातृतीयश्चांशेशनिस्तेनलग्ने
द्वादशोमध्यमाग्रेगुरुस्ततःकन्याराशौगुरुःषष्ठःतर्जन्यामुरवेभौमस्तेनलग्नान्नवमेधनुराशौमंगलराहुःकनिष्ठाद्वितीयांशस्थतेनलग्नादेका
दशःसूर्योऽपितर्जनीद्वितीयश्चांशस्थःतेनलग्नेऽष्टमःतथानदीभमश्विनीसानुचंद्रचक्रानुसारेणकनिष्ठायाआद्यश्चांशस्थानीयातेनल
ग्नाद्दशमश्चंद्रःशुक्रबुधौजन्मलग्नवदेवज्ञेयौतेनलग्नस्यांगुल्याःप्रथमत्रिभागस्थत्वात्सूर्येणमिलीनावेवलग्नादष्टमौ एवंदिन
लग्नग्रहाज्ञेयाः केषांचिन्मतेलग्नंनिर्णीयज्योतिश्चारेणैवग्रहस्थापनंअस्मिन्नेवावसरेद्वितीयःकरंदर्शयतितदालग्नात्सप्तमभवंतु
तुलालग्नतन्मूर्त्येव्यवस्थाप्यग्रहांस्तुपूर्ववदेवदत्वाविचारयेत्॥इतिदिनलग्नचक्रदर्शनं॥लग्नंचेत्प्रथमेत्र्यंशेद्रेष्काणःप्रथमस्तदा॥
द्वितीयश्चद्वितीयांशेतृतीयश्चतृतीयके॥५८॥इतिद्रेष्काणः॥नक्षत्रचक्रतोनूनंविज्ञेयंयोगचक्रकं॥भूतलेदिनयोगस्यस्थापनात्सर्व
मीक्षते॥५९॥योयोगोदुष्टभागस्थःसवर्ज्यःशुभकर्मसु॥अशुभेसमुयादेवोमायारूपविचिंतनात्॥६०॥इतियोगचक्रदर्शनं॥ ॥
अथकस्यांदिशिमेलाभइतिप्रश्नेदिग्चक्रमाह॥दिशिकस्यांमयालभ्यंमितिज्ञेयोकरेक्षणे॥यत्रात्मभंभवेदक्षंचक्रानुक्रमतोदि

क्षि॥६१॥ मध्यमेंगुष्टभेस्त्रीये ग्रामे सौख्यं विनिर्दिशेन्॥ ऋक्षत्रयेंगुलीनांतु प्रागुक्तांनदिशोंल्लभेत्॥६२॥ राजाद्ययोरंनरेब्धिराजाद्ये
भ्येव्यवस्थिनः॥ राज्ञोमूलेरवदेशादिग्रामोवक्रेतुपल्लिका॥६३॥ पर्यन्तपर्वतोदेशो मेरुः करभसीमनि॥ गुर्जराष्ट्रस्कराष्ट्राश्चास्ताद्रिर-
त्नाकरांतरे॥६४॥ अंगुष्टमूलेक्षयतीर्थमेतदाद्यप्रभोस्तारणकेवटोयं॥ समध्यदेशास्ततएवचक्रं दिशांविबोध्यंविदिशांचविज्ञैः
॥६५॥ दिग्भागेयतृतीयंभंताह्विदिग्धिष्ण्यमुच्यते॥ यद्वास्तज्जन्मलग्नेन दिग्विदिग्वाविमृश्यते॥६६॥ इतिदिग्चक्रदर्शनं॥ ॥अथदेहे
ऋभाऋभप्रश्नेदेहहस्तचक्रमाह॥ अंगुष्टाद्याःपंचवर्णाः सीतपीतारुणाहरित्॥ श्यामश्वेत्यथभूतानांतत्वानांपंचकंयथा॥६७
॥तर्जनीपृथिवीमध्याजलंवायुरनामिका॥ कनिष्ठातेजइत्यन्का मंगुष्ठोयो भुजायग्मंतर्जनीमध्यमापिच॥ स्त्रोप्यंगुल्योजीवों
गुष्ठोबुधैःस्मृतः॥ तन्मूलनाड्याहंसोयंयत्करोतिगतागतं॥६९॥ मूर्द्धांगुष्ठोभुजायग्मंतर्जनीमध्यमापिच॥ पादावनामिकाता
राप्राणिनामंगपंचकं॥७०॥ शिरोमुखंतथाकंठोंगुष्ठेभागत्रयंस्मृतं॥ जठरंचकटिर्गुह्यं तालिकायांत्रयंस्थितं॥७१॥ मध्यमायां
प्रदेशिन्यांस्कंधौ२ बाहूच२ कूर्परे॥ उरू१ जंघेच२ चरणौ३ त्रयंगौरिकनिष्ठयोः॥७२॥ हस्तरूपस्यकायस्य क्रमादवयवात्वमी
॥ऋभाऋभंनृणांचिन्हंघातादिर्येषुलक्ष्यते॥७३॥ इतिदेहचक्रदर्शनं॥ मस्तकेत्रयमास्येच कंठेभानांत्रयंत्रयं॥ जठरेचत्रयं
देयंशेषांगेद्वौकटौचभूः॥७४॥ आत्मभाद्दिनभंयत्रतत्फलंप्रस्तुरादिशो॥ शीर्षेमुखेनथाकंठे राज्यंभोज्यंसुखंभवेत्॥७५॥ जठ
रेगुरुचिंतास्यात् गुह्येभोगोनृपाद्धनं॥ स्कंधेजयोथ्यतेशेषांगेक्लेशोहानिर्भयंभवेत्॥७६॥ इतिदेहचक्रानुमानेनहस्तचक्रं॥
मुष्टीज्ञानमते॥ अंगुष्टःपंचवर्णःस्यात् रक्तपीतः सितासिताः॥ शात्रुह्वावाहरित्यीतरक्तोपिंगसितेरुणः॥७७॥ मध्यमानामि
काजिव्हासावित्रीचप्रदेशिनी॥ स्पर्शनिंरसनंताराश्रोत्रमंगुल्कोमतः॥७८॥ अंगुष्टोमधुरोमध्यातिक्ताकद्वीप्रदेशिनी॥ कषा
यानामिकाचाम्ला कनिष्ठारसपंचकैः॥७९॥ दुर्गधातर्जनीशब्दः सुगंधोंगुष्टईरितः॥ स्कगंधानामिकाकिंचिन्निर्गंधामध्य
मालघुः॥८०॥ कठोरोंगुष्टकोगुर्वीमध्यऋक्षोष्णकारिहा॥ कनिष्ठःकामल्लालघ्वीलक्ष्मीस्निग्धाहिमाशिवा॥८१॥ मतांतरे

बंधनैर्निगूढैः दृढैश्चसुश्लिष्टसंधिभिर्भूपाः॥हीनैर्हस्तच्छेदः श्लथैःसशब्दैश्चनिर्द्रव्याः॥३७॥ अन्यः॥रेखाभिःपूर्णाभिस्तिसृभिः करमूल
मंकितंयस्य॥ धनकांचनरत्नयुतंश्रीपतिमिवभजतिलक्ष्मीव॥३८॥ बिसतंतुनिभारेखायस्यवैमणिबंधगा॥सभवेद्द्रव्यसंपन्नस्तारांश्चैवनिशा
करः॥३९॥ अभग्नोपचितकपूरमांसलंचतुर्मात्रमष्टमात्रं मेखलास्वस्तिकं मणिबंधं॥४०॥ भद्रोत्पलः॥ मणिबंधोमनुष्यस्यरेखारज्जुनिभा
भवेत्॥स्वर्धुनीमज्जनकरोरेखांकोऽपिकद्रुप्रियः॥४१॥ सुवर्तुलैर्निगूढैश्च मणिबंधैःसमन्विताः॥ दृढैश्चपट्टरहितैःराजानस्तेप्रकल्पिताः
॥४२॥ विवेकविलासे।पाणिमूलंदृढंगूढंश्लाघ्यंसुश्लिष्टसंधिकं॥ श्लथंपट्टहीनंचनिर्धनत्वादिदुःखदं॥४३॥ अत्रयवमालाफलं॥
त्रिःपरिक्षेयाव्यक्तायवमालाभवतियस्यमणिबंधे॥ नियतंमहार्थसहितोससार्वभौममानराधिपतिः॥४४॥ करमूलेयवमालाद्विःपरिक्षेया
मनोहरायस्य॥ मनुजःसराजमंत्री विपुलमतिर्जायतेमतिमान्॥४५॥ सुभगैकापरिक्षेयायवमालायस्यपाणिमूलेस्यात्॥सभवतिध
नधान्ययुतःश्रेष्ठीजनपूजितोमनुजः॥४६॥ यदितिस्त्रोयवमालामणिबंधादुभयतोविनिःसृत्या। परिवेष्टयंतिपृष्टंतदधिकनममिहफ
लंज्ञेयं॥४७॥ इहनाभिः पूर्णाभिः पूर्णाप्राप्नोतिसंपदंसंपदि॥ मध्याभिर्मध्यांह्रस्वाभिर्वापुमान्ह्रस्वां॥४८॥ अथरत्नकंकणलक्षणं॥म
णिबंधोत्थितारेखानिम्नकरतलोपगा।यदितद्रत्नवलयमित्याहुर्नारदादयः॥४९॥रत्नकंकणरेखातुयस्यहस्तेविराजते॥ तस्यराज्यंविनिर्दिष्टं
समुद्रवचनंयथा॥५०॥ अथअंगुष्ठलक्षणं॥ ऋजुरंगुष्टःस्निग्धः स्थूलोवृत्तःप्रदक्षिणावर्त्तः॥ अंगुष्टेऽपिधनवतांसुधनानिसमानिपर्वाणि
॥५१॥पाण्यंगुष्ठोद्वयस्थूलौशिरारोमयुतौखरौ॥ अहितौतौविनिर्दिष्टौशैशवेसौख्यदायकौ॥५२॥ शिवः॥ अंगुष्ठौविरलौयेषांतेनरा
दुःखभागिनः॥ क्लिश्यंतेविपुलांगुष्टास्तथाचाध्वानगामिनः॥५३॥ अथांगुलिलक्षणं॥ वराहः॥ हस्तांगुलयोदीर्घाश्चिरायुषांमनवलि
ताश्चसुभगानां॥ मेधाविनांचसूक्ष्माश्चिपिटाःपरिकर्मरतानां॥५४॥ अन्यः॥दीर्घाभिरंगुलिभिःसौभाग्ययुतःसुदीर्घपर्वाभिः॥ विरला
भिःकुटिलाभिःसुष्काभिर्भवतिधनहीनाः॥५५॥स्थूलाघनोज्झितानांशस्त्रांतानांबहिर्नताःपुंसां॥ह्रस्वांगुलयश्चिपिटाःश्चेष्टानांहंत
जातानां॥५६॥ अंगुष्टोऽस्यांगुलीर्भावासंख्यान्यूनाधिकास्फुटंयस्य॥ धनधान्यैःपरिहीनाःसोल्पायुर्भूतलेभ्रमति॥५७॥गारुडे॥ अंगु

करौ ॥ विलिप्यपुष्पैः संपूर्यस्पृशयास्त्र्यंशास्तदंगुलैः ॥ १६ ॥ प्रभवाद्याः समाः सर्वाः कांचन्याद्यत्रिभागतः ॥ संवत्सरं वर्तमानं व्यवस्था
प्यविलोकयेत् ॥ १७ ॥ स्पष्टे विशोपके वर्षे प्राप्तं तस्य शुभाशुभं ॥ वाच्यं नक्षत्रचक्रानुक्रमनो दिग्विचार्यते ॥ १८ ॥ यद्दानास्त्रमये पात्रे
कौंकुमस्थासकद्वयं ॥ कुमार्याः कारयेत्तत्र फलन्यासात् शुभाशुभं ॥ १९ ॥ अत्र भाष्यं ॥ कनिष्ठायाः प्रथमविशोपकात् प्रभवानि वर्षा
णि भवंति पंचदशसंख्यानि ततोऽन्यस्मिन्हस्ते पंचदश एवं वारद्वये वत्सराणां षष्टिर्भवति अत्र पूर्वं वामः पश्चाद्दक्षिणो हस्तस्ततो भूयोऽपि
वामस्ततो दक्षिण इति क्रमः स्वीतात् ततो वर्तमानवत्सरं नाम्नाज्योतिषानुसारेण निर्णीय यद्वर्षे यत्र त्र्यंशो समयाति तदंगुलिस्वरूपात् रेखा
चक्रादि विमर्शात् फलं शुभाशुभं तद्वत्सरे भवतीति एवं युगमपितारादि द्वादशभागक्रमेण विचार्यं ॥ अत्रोदाहरणं ॥ संवत् १७३७
वर्षे सुभिक्षनिर्णयाय यथाविधि कुमार्याः स्पृष्टो दक्षिणहस्तस्य अनामिकायास्तृतीयस्त्र्यंशस्तेन प्राप्तः एकविंशतितमः सर्वजित्नामसं
वत्सरः एवं च त्रिंशद्वत्सरफलानि लभ्यंते ॥ यदि च चित्रभान्वादि द्वितीयपंचदशके वर्तमानः संवत्सरो भवति तदा वामानामिकातृतीयत्र्यं
शो स्पृष्टे चित्रभानोरेकविंशतिमः शुभकृत् संवत्सरो भवति एवं हेमलंबादि तृतीयपंचदशके वर्तमानः संवत्सरः तदा दक्षिणहस्तानामिका
तृतीयत्र्यंशो स्पृष्टे हेमलंबादेकविंशतितमः पिंगलसंवत्सरः स्यात् एवं परिधाव्यादि चतुर्थपंचदशके वर्तमानः संवत्सरस्तदा वामानामि
कातृतीयत्र्यंशो स्पृष्टे परिधाविनः एकविंशतिमः अंगिराः स्यात् अत्र तु प्रमोदनामा संवत्सरः वर्तमानस्तेन एकविंशतितमः सर्वजित् वा
च्यः तत उक्तं वर्तमानं संवत्सरं व्यवस्थाप्य विलोकयेत् इति ॥ अथ वर्षे ज्ञातेऽपि कस्यां दिशि शुभमशुभं वा भविष्यतीति ज्ञातव्ये अस्य
य तृतीयादिवसे सूर्योदये यन्नक्षत्रं तद्भूतले दत्वा यत्र यद्दिशिस्थाने संवत्सरं आयाति तत्रस्थाने रेखा ग्रहादि विचारणया फलं वाच्यं ॥ अथ
दिग्ज्ञानेऽपि संवत्सरभं गर्भके दत्वा यत्र देशभं शुभाशुभं वाच्यं एकस्मिन्देशेऽपि देशभं भूतले दत्वा यत्र ग्रामभं आयाति तत्रस्थानादि वि
चारणया शुभं ज्ञेयं ग्रामेऽपि ग्रामभं हस्ततले दत्वा यत्र गृहपते ग्रामपतेर्वा नामभं तत्र फलं शुभाशुभं वाच्यं ॥ क्रूराक्रांतं दुष्टरेखं य
द्दुष्टग्रहेक्षितं ॥ संवत्सरेण राश्यादिमेलकं च विचारयेत् ॥ २०० ॥ हस्तस्पर्शक्षणे दैवात् आषाढः श्रावणोऽपि वा ॥ तदाति वृष्टिर्ज्ञे-

॥७९॥ गोविंदचरणार्थीचांतन्मिथंकर्मकुर्वतां॥ चापचक्रांकितौनस्यनान्यकर्मकरौकरौ॥८०॥ एकंचक्रंकरेयस्यानामिकाग्रेमुबर्नुलं
॥अनायासेनविज्ञेया विद्यातस्यनरस्यच॥८१॥दीर्घायुःसधनश्चैवतथास्त्रीजनवल्लभः॥ धनवानूपुत्रवानूगौडःप्राज्ञःसाहसिकश्चनः
॥८२॥ कनिष्ठायांयदाचक्रंवाणिज्येनधनंलभेत्॥ नेनैवविपरीतेनव्ययोभवतिनिश्चितं॥८३॥ व्ययोव्ययेनीतिहनिश्चनूनंकनीयसाताःक्र
मचक्रयोगात्॥ सर्वासुचक्रैःपरितांगुलीसुमहाधनास्तिश्चनरस्यजायते॥८४॥एकचक्रीसुखंभुंक्तेद्विचक्रीरिपुवर्द्धनं॥ त्रिचक्रेराज्य
सन्मानंचतुश्चक्रेसुभुंक्ष्यनि॥८५॥पादचक्रेभवेद्योगीस्त्रीयांगुष्टेचचक्रकं॥अन्यः॥ दशचक्रे भवेद्राजापंचचक्रीनराधिपः॥ ८६॥च
तुश्चक्रीभवेदुःखीसुमंतुर्मुनिरब्रवीत्॥ अथशंखचक्राणामाकारवशात्फलं॥ स्निग्धंसिद्धिप्रदंनित्यंसूक्ष्मंदिव्यफलप्रदं॥ ८७॥ संतोषं
सीतलांगंचवृत्तंसिद्धिप्रदायकं॥ वामचक्रंमध्यचक्रंपुत्रपौत्रविवर्द्धनं॥कीर्तिप्रदंचारुचक्रंगव्हरंमानदंभुवि॥ कल्मालंकुलनाशस्यात्‌ंविक
राल्मनिष्टदं॥८९॥ कार्यविघ्नकरंतिर्यक्‌दिशंचक्रंचशोकदं॥ अनिष्टंस्थूलचक्रंचऊर्ध्वमुच्चाटनंस्मृतं॥९०॥ अधोचक्रंपार्श्वचक्रं क्षयरोग
विधायकं॥ त्रिरश्चक्रंपुत्रवृद्धिप्रतिबंधकमीरितं॥९१॥ दुःस्वप्नंचक्रतुंडंचमित्रघ्नंबद्धचक्रकं॥ अचक्रंसर्वशून्यंच भूचक्रंचभयप्रदं॥९२॥
पापदंभग्नचक्रंचभुग्नचक्रंचस्तेयदं॥ विषमंचक्रविषमे बहुचक्रंकुलक्षयं॥९३॥पंक्तिचक्रंपंक्तिघ्नंस्याद्विवर्णंकुलनाशनं॥ अथनखल
क्षणं॥गारुडे॥तुषतुल्यनखाःक्लीबाः कुटिलैःस्फुटितैर्नरवैः॥ ९४॥ निस्वाल्पकुनखैस्मह‌द्विवर्णैःपरतर्ककाः॥गर्गः॥ सूर्पशक्तितुषनखा
नैकवर्णाःमहाबलाः॥९५॥स्फुटितार्द्धनखाश्चैवनराद्रव्यविवर्जिताः॥पुष्ययुतैश्चदुःशीलाश्वेतैश्चश्रवणानराः॥९६॥ विलासे॥ श्वेतैर्थनि
त्वमत्स्याभैर्नैस्यंपीनैः सरोगता॥ दीर्घैर्नरवैश्चदारिद्र्यंक्रौर्यंव्याघ्रापमैर्नरवैः॥९७॥ सुक्ताभैःश्यामलैःस्थूलैःस्फुटिताग्रैश्चनीलकैः॥ अद्योतरूक्ष
वक्रैश्चनखैःपातकिनांऽधमाः॥९८॥ तर्जन्यादिनखैर्भग्नैर्जातमात्रस्यतुक्रमात्॥ अर्द्धत्र्यंशाचतुर्थांशाष्टांशास्युःस्महजायुषः॥९९॥ अंगुष्टस्यन
खेभग्नेधर्मतीर्थरतानरः॥ कूर्मोन्नतेंऽगुष्टनखेनरःस्याद्भाग्यवर्जितः॥१०॥ इतिनखानांनेष्टलक्षणं॥ अथनखानांश्रेष्ठलक्षणमाह॥ वरा
हः॥ विद्रुमरुचयःश्लक्ष्णाःपाणिनखाः कच्छपोन्नताःस्निग्धाः॥ सशिखाःक्रमेणविपुलाःपर्वार्द्धमितामहेशानां॥१॥ शैवसामुद्रिके॥इंद्र

स्त्र्यंशाः मध्यामूलस्त्र्यंशाः तदाशशिरवीति सितपक्षक्रमाश्रयणात् ज्ञातः सूरोदयः मध्यामूलत्र्यंशास्यत्वाल्लक्ष्मीप्राप्त्यादि शुभफलइतिकष्टात्
एवंदर्शनतःस्वरोदयः स्पर्शोनुयोभागोयेनस्पृष्टस्तंयावत् उदयिकतिथिस्थानत्र्यंशादारभ्यशशिरवीति सितपक्षक्रमाश्रयणात् चंद्रःसूर्योवायः
समायातिसस्वरोदयःप्राप्तः अक्षयतृतीयादिकृष्णपक्षेतुरविशशीतिज्ञेयं॥ इतिस्पर्शनेनस्वरोदयः ॥ अथभौमविचारः ॥ आद्यःप्रभोर्भगवतः
यारजेहेदिनोदये॥ यस्यकस्यापिसंस्पृश्यः पाणिर्वाणिज्यशालितः॥२२०॥ गुरुणाभुज्यमानंयत्नक्षत्रंदीयते तले॥ यत्रायातिचयद्देशनक्षत्रं
तद्विचार्यते॥२२१॥ मंगलेनसमाक्रांतंदृष्टंवात्रिपुरांतगं॥ तद्देशोभूमिकंपःस्यान्मारिर्वाराजविग्रहः॥२२२॥ शनिनायत्समाक्रांतंदृष्टंदक्षिणादिग्
तं॥ तत्रदेशोभयंभंगोदुर्भिक्षंराजविड्वरं॥२२३॥ अथव्यंजनलक्षणं॥ अनंतवीर्यस्यपुंसोवयवाप्राग्निवेदिताः॥ तद्रेखायाःप्रमाणेनज्ञेयेव्यं
जनलक्षणे॥२२४॥ यत्रोर्ध्वरेखातत्रस्याच्छुभंचान्यत्रनोशुभं॥ यद्वाराहोःशनेर्वाभमश्विन्यादिभचक्रके॥२२५॥ तारादिद्वादशांशेषु
यत्रयत्राशुभंदिशेत्॥ प्रागुक्तावयवापक्षंशुभंतुगुरुभेस्मृतं॥२२६॥ अथउत्पातलक्षणं॥ यत्रराहुसमाक्रांतंदेशाभंतत्रसंभवेत्॥ उत्पातो
विग्रहो घोरश्चक्रमस्यतुभौमवत्॥२२७॥ यद्वाकनीनिकापूर्वत्र्यंशाद्दत्तरसंस्थितौ॥ यत्रवर्षवर्तमानंतत्स्थानेनविचार्यते॥२१८॥ अथअं
तरिक्षलक्षणं॥ वर्षमासायनतिथिलग्नधिष्ण्यविमर्शनं॥ ग्रहाद्यंपूर्वमेवोक्तं अंतरिक्षंनिरीक्ष्यते॥२२९॥ अथचूडामणिः ॥ विज्ञेया
अइउएओस्वरांऽगुष्ठतःक्रमात्॥ अंगुष्ठउत्तरोलघ्वीअधरानामतोमता॥२३०॥ आलिंगितानामिकास्यान्मध्यमात्वभिधूमिता॥ दग्धा
प्रदेशिनीतासांफलंचूडामणौस्फुटं॥२३१॥ अथशकुनं॥ लक्ष्मीस्यात्सोतकीराजाभषणोनामिकाशिवा॥ कनिष्ठापिंगलाकाकःप्रदे
शिन्यांव्यवस्थितः॥२३२॥ शकुनेक्षणवेलायांसंयोज्यपाणियामलं॥ अंजलिंमंत्रयेन्मायामुखेन्यासेनसांगुलं॥२३३॥ अंनमइंनम
श्चाग्रेउंनमस्तनऐंनमः॥ ॐनमोविष्णुतोज्ञेयः क्रमोन्यासेभिमंत्रणे॥२३४॥ शारवीदशकसंस्पर्शाद्वामावामविमर्षतः॥ क्षेमपूर्वंवदे
ल्लाभोज्ज्वालाशकुनपंचकं॥२३५॥ स्थानंचेष्टातथावेलाबलाबलंपरस्परं॥ प्राज्ञःशकुनशास्त्रेण रत्नपंचकतोवदेत्॥२३६॥ तारादिक्र
मतश्चैकंद्विकंत्रिकंचतुष्ककं॥ त्रिवारंस्पर्शनाद्बोध्याहस्तेपाशाककेवली॥२३७॥ इतिहस्तस्पर्शशकुनावली॥ प्रणवाःशकुपाणीतिदि

वेंगुष्टस्यमध्यगे॥ २२॥ शैवसामुद्रिके॥ मणिबंधेयवश्रेण्यः स्तिस्त्रश्चेत्तुनृपोभवेत्॥ यदिताः पाणिपृष्ठेऽपिततोऽधिकतरंफलं॥ २३॥ द्वा
भ्यांचयवमालाभ्यांराजामंत्रीधनीबुधः॥ एकयायवपंक्त्यांतुश्रेष्ठोबहुधनोर्चितः॥ २४॥ एतत्पद्यंपूर्वमुक्तेसत्यपिप्रकरणपठितत्वादत्रो
क्तं॥ अथतिलचिन्हफलं॥ करतलेयदियस्यतिलोभवेदविरतःकिलतस्यधनागमः॥ पदतलेचतिलेनसमन्वितोनृपतिवाहनचिन्हसमन्वितः
॥२५॥ स्पष्टैर्यवैस्तस्यलिंगेतिलैस्तुपरिकीर्तितः॥ वामेतिलेसुखीलिंगेबहुकामीतुदक्षिणे॥ २६॥ तिलोहस्ततलेराज्ञांनिद्यःसवणिजांशुभः॥
ध्वजोनवणिजांश्रेष्ठोदेशभ्रमणकारणात्॥ २७॥ हृदिबाह्वादिषुतच्चेद्दुःखलाभादिकंस्फुटं॥ २८॥ अथपाणितलेअल्परेखाबहुरेखाफ
लं॥ बहुरेखापलिकलितंपाणितलंभवतियस्यमनुजस्य॥ यदिवारेखाहीनंसोल्पायुर्दुःखितोनिस्वः॥ २९॥ रेखाभिर्बहुभिःक्लेशंस्वल्पा
भिर्धनहीनता॥ रेखाचतुष्टयेसौख्यंबहुरेखादरिद्रता॥ ३०॥ बहुरेखासूक्ष्मरेखापाणिमध्येतुसंस्थिता॥ धातुक्षयोभवेत्तस्यनित्यंचसरुजस्तथा॥
॥३१॥ अल्परेखाभिःकुवादीनरोभवतिइतिमनांतरं॥ ३२॥ अथकररेखाप्रशंसा॥ अधुनामीनाद्याकृतिरेखाणांलक्षणंस्फुटंवक्ष्ये॥ वामकरे
नारीणांदक्षिणपाणौनराणांतु॥ ३३॥ जीवितमरणेलाभालाभौसुखदुःखमिहजगत्यखिलं॥ कररेखाभिःप्रायःप्राप्नोतिनरोथनारीवा॥ ३४॥
अथरेखायाःवर्णफलं॥ रक्ताभिःसुखमाप्नोतिकृष्णाभिर्दुःखितोभवेत्॥ कृष्णाभिर्लोकपूज्यतेतिवापाठः॥ कीर्तिभोगप्रदाकृष्णापांडुरापाप
हारिणी॥ ३५॥ पीतापुत्रप्रदानित्यंलक्ष्मीशांतिप्रदातथा॥ ज्ञेनीलाबन्धदाज्ञेयातथावैकांतिदायिनी॥ ३६॥ पुष्टिवृद्धिप्रदाश्यामाश्वेतासात्विक
दायिनी॥ शतायुःकृपणोरक्तेकृष्णाभिःप्रेष्यतांव्रजेत्॥ ३७॥ अथफलदात्रीरेखास्वरूपं॥ अच्छिन्नागंभीरापूर्णारक्ताब्जदलनिभामृदुला॥ अंत
र्वृत्तास्निग्धाकररेखाशस्यतेपुंसां॥ ३८॥ निम्नाःसूक्ष्माभवेन्नृणांरेखाकरतलेगुहः॥ धनिनांनदरिद्राणांमित्याहसपयोनिधिः॥ ३९॥ विवेकवि
लासे॥ सूक्ष्माःस्निग्धाश्चगंभीराःप्रलंबाःमधुपिंगलाः॥ अव्यावृत्तगतिच्छेदाकरेरेखाशुभानृणां॥ ४०॥ त्यागायशोणगंभीराःसुखायमधुपिं
गलाः॥ सूक्ष्माःश्रियेस्वयेयुक्ताःसौभाग्यायसमूलकाः॥ ४१॥ अथअशुभरेखास्वरूपं॥ छिन्नासपल्लवारुक्षाःविषमाःस्थानकच्युताः॥ विव-
र्णाःस्फुटिताःकृष्णानीलाह्रस्वाश्चनोत्तमाः॥ ४२॥ क्लेशंसपल्लवारेखाछिन्नाजीवितसंशयं॥ कदन्नंपरुषाद्रव्यंविनाशंविषमार्पयेत्॥ ४३॥ अ

वामांगतः फलं॥ पुंस्त्वेयास्त्रियोजातास्तासांदक्षांगतः फलं ॥१६॥ इत्यंगनिर्णयः ॥ अथ करलक्षणं ॥ मणिबंधात्पुरःपाणिः तस्य
लक्षणमुच्यते॥ शोणः पाणिर्भवेद्यस्यसुवीर्यानुपसेवते॥१७॥ पाणीनृपतेः श्लक्ष्णौ निःस्वेदौमांसलावथाच्छिद्रौ॥ अरुणावकर्मकठि
नावुष्णोदीर्घांगुलीस्निग्धौ॥१८॥ विस्तीर्णौताम्रनरवौस्याताः कपिवत्करौधनाढयस्य॥ शार्दूलवद्विरुक्षौ विकृतौनिस्वस्यनिर्मांसौ
॥१९॥ क्रव्यादरूपैर्वृककाककंकैसरिसृपोलूकसमानचिन्हैः॥ वक्रैः शिरालैर्विषमैश्चहस्तैर्येषांसदातेसुखवित्तहीनाः॥२०॥ कपिस
दृशाकराधनिनोव्याघ्रोपम पाणयःपापाः॥ हिमज्वलनघृतारविंद प्रवालप्रभौस्कबहुस्निग्धौ॥२१॥ मतांतरे॥ कपितुल्यकराभूपाव्याघ्रतु
ल्यकरामलाः॥ कमठीपृष्ठकठिनावकर्मकरणौकरौ॥२२॥ अरोमाणावशिरालौराज्यसौख्यप्रदायकौ॥ अथकरतललक्षणं॥ निम्नं
करतलंयस्यपितृवित्तंनतस्यवै॥२३॥ सभवेद्देवशाद्दूलतथाहीनश्चमानवः॥ अतिवृत्तेननिम्नेनधनीकरतलेनवै॥२४॥ उत्तानकरत
लोदाताभवतीहनसंशयः॥ विषमैर्विषमाज्ञेयानिस्वाश्चापिविशेषतः॥२५॥ वर्णफलं॥ अरुणेनाढयःपीतेनागम्यःस्त्रीरतिःकर
तलेन॥ असितसितेनदरिद्रोनीलेनापेयपायीस्यात्॥२६॥ लाक्षाभैरीश्वरोरुक्षैर्निर्द्रव्योनीलकृष्णकैः॥ अपेयपानंकुरुतेमतमन्यहृदाम्य
हि॥२७॥ विवेकविलासे॥ पाणेस्तलेनशोणेनधणीनीलेनमद्यपः॥ कृष्णेनचधनत्यक्तोपीतेनागम्यनारिकः॥२८॥ ब्राम्हणेविशेषः॥ रक्तंपा
णितलंयस्यद्विजस्यतुविशेषतः॥ यज्ञयाजीभवेन्नित्यंबहुवित्तश्चमानवः॥२९॥ पीतंकरतलंयस्यसयज्वादाननत्परः॥ गुरुदेवरतोदेवोदैवज्ञो
देवपूजितः॥३०॥ हस्तसंजीवने॥ अकर्मकठिनंपाणितलंमध्येतदुन्नतं॥ दानिनांकृपणानांतुभवेदत्यंतनिम्नगं॥३१॥ तलंवक्रंतथाह्रस्वंमति
दीर्घंचनोशुभं॥ नारदोक्तेविशेषः॥ पंचांगुलिप्रमाणेनहस्तमूलंप्रकल्पयेत्॥३२॥ आयुष्यरेखयोर्मध्येमध्याचैवदरिद्रता॥ तदग्रेराजस
न्मानंतदग्रेचधनागमं॥३३॥ तदग्रेराज्यसंप्राप्तिसप्तद्वीपाधिपोभवेत्॥ अथकरपृष्ठलक्षणं॥ विवेकविलासे॥ करपृष्ठंसुविस्तीर्णंपीनंस्निग्धं
समुन्नतं॥३४॥ श्लाघ्यंगूढशिरंनृणांफलभृत्फणसन्निभं॥ हस्तबिंबे॥ श्रेष्ठंचारोमशंस्पृष्टंमणिबंधाकितंशुभं॥३५॥ अन्यत्रविलासे॥
विवर्णपुरुषंरुक्षंरोमशंमांसवर्जितं॥ मणिबंधसमंनिम्नंनश्रेष्टंकरपृष्टकं॥३६॥ सशिरंनेष्टमित्यपरे॥ अथमणिबंधालक्षणंवराहः॥ मणि

अंगुलोत्रगुरूलघुकमीष्टादिनीघुर्मृदुः गुरुः स्निग्धः पुनरूक्षाः शीनाः स्निग्धातिरुक्षिका। अंगुष्टोवर्तुलस्त्वस्थाकांचनी चप्रदेशिनी ॥ चतुरस्त्रातिदीर्घास्याज्येष्टाह्रस्वाशिवामता ॥ ८३ ॥ जयाविपूर्वातारादिर्जयंत्यप्यपराजिता ॥ आदिनाथो त्वमृतभुक् अंगुष्टोजगदीश्वरः ॥ ८४ ॥ एवंपाणिनिरूपणेवरधियांलोकत्रयी चिन्मयी भावोभावनयाभवेद्बहुविधप्रश्नप्रकाशोदयात् ॥ वाल्हुभ्यंविशदार्थलभ्यमनिशंतेषांविशेषाद्गिरंसभ्यानांसमुदेनिमघविजयंस्वारस्यमुसश्यतां ॥ १८५ ॥ इतिबृ॰ षष्ठमिश्रस्कंधेसामुद्रिकलक्षणाध्यायेप्रथमप्रकरणेदर्शनाधिकारः ॥ अथहस्तस्पर्शनोपरिअनेकविधप्रश्ननिर्णयः ॥ स्पर्शनादंगविद्यायांयथाफलमुदीर्यते ॥ तथावाच्यंफलंस्पर्शादंगत्वात्शक्तिशालिनः ॥ ॥ १८६ ॥ सर्वतोभद्रयंत्रंतल्लिखित्वापाणिगर्भके ॥ पुष्पैःफलैश्चतत्पूजांकृत्वामायाःस्पृशेद्बुधः ॥ ८७ ॥ ज्ञेयासामान्यतः प्रच्छास्त्रिपुरास्पर्शतारिवला ॥ सांगुष्टंविषमाः श्रेष्टाः समास्तुशोभनाः क्वचित् ॥ ८८ ॥ लाभालाभौसुखंदुःखंजीवितंमरणंतथा ॥ गमागमौजयंभंगंकार्याकार्येवकभावकभे ॥ ८९ ॥ चतुःप्रियादिक्रमतः स्पर्शात्पंचांगुलैरिदं ॥ वाच्यंविचक्षणेर्यद्वाजन्मलग्नविलग्नयोः ॥ ९० ॥ लौकिकाअपिस्पर्शाच्छकुनमाहुः ॥ रामचंद्रश्वरिलीला विलाससीताकष्टसेवनवनवासहनूउकांद्रकवातजणा वइलक्ष्मणकार्यकरीघरआवे ॥ १ ॥ इतिचतुरंगुलीस्पर्शात्गमागमप्रच्छा ॥ दिनमानमपिज्ञेयंअंशास्पर्शेनदुर्दिने ॥ यातिथिःसाघटीवाच्याज्योतिषेऽपिचसंमता ॥ ९१ ॥ अतउक्तंज्योतिःशास्त्रे ॥ एकैकादशचैकविंशतिघटीपूर्वकनिष्टांगुलीपर्वैरंगुलिभिर्जनैर्निगदिनेबुध्यापरैर्ज्ञायते ॥ एकैकेनकरस्यपंडितवरैर्बुध्यागिरावागुरोरेवंवेंदुरवीविनापिसततंरात्रिंदिवंप्रोच्यते ॥ ९२ ॥ मतांतरे पुररंगुष्टादिपंचके पंचतिथयः ततस्तर्जन्यादिचतुष्टयेचतस्त्रस्तिथयःपुनरंगुष्टादिपंचकेपंचतिथयः पुनरंगुष्टेपंचदशीतिस्पर्शान्दिनमानंदृश्यते ॥ यदुक्तं ॥ अंगुष्टादौविजानीयादेक १ दिक् १० तिथि १५ संख्यातर्जनीद्वि २ रसा ६ रुद्रा ११ मध्यमाग्र्यगभास्कराः ३।७।१२।१३ वेदाः ४ अष्टौ ८ चविश्व १३ श्वपंच ५ नंदा ९ श्चतुर्दश १४ ॥ गतशेषाणिलभ्यंतेदिवारात्रौघटीमितिः ॥ ९४ ॥ भाष्यं ॥ एतन्मतेअंगुष्ठेचंद्रोदयोऽपियुक्तः ॥ प्राच्यमतंदक्षिणहस्तेवामहस्तेपाश्चात्यंमतंज्ञेयमितिसिद्धांतः ॥ लोकेकीदृगिदंवर्षंसुभिक्षंवातदन्यथा ॥ भविष्यतीतिज्ञातव्येकुमारींपरिपूजयेत् ॥ ९५ ॥ संभोज्यमधुरास्वादैः कुंकुमैश्चंदनैः

लिविरलाः ह्रस्वाद्दश्यंतेंगुलयः करे॥ तेचोरास्तुनराज्ञेयाः सदादारिद्रभाजनाः॥५८॥ पांडुराविरलारुक्षास्ते ऽपितत्फलदायकाः॥ विवे
कविलासे॥ अनामिकांत्यरेखायाः कनिष्ठास्ययदाधिका॥५९॥ धनवृद्धिस्तदापुंसां मातृपक्षोबहुस्तथा॥ मध्यमाप्रांतरेखायाः अधिका
यदितर्जनी॥६०॥ प्रचुरस्तत्पितुः पक्षः श्रीश्चव्यत्ययतोऽन्यथा॥ शिवः॥ यस्यप्रदेशिनीदीर्घा अंगुष्टंचव्यतिक्रमेत्॥६१॥ स्त्रीभोगलभतेनि
त्यंपुरुषोनात्रसंशयः॥ मध्यमायांतुदीर्घायां भार्याहीनंविनिर्दिशेत्॥६२॥ अनामिकायांदीर्घायां तंविद्यात्परदारगं॥ यस्यप्रदेशिनीस्थूनाभ
क्तश्चैवकनिष्ठिकां॥६३॥ ह्रस्वाक्लेशायेतिशेषः॥ श्लिष्टान्यंगुलिमध्यानिद्रव्यसंचयहेतवे॥ तानिछिद्रप्रयुक्तानित्यागशीलस्ततोनरः॥६४॥
हस्तसंजीवने॥ दीर्घानिर्मांसपर्वाणः सूक्ष्माःदीर्घाःस्त्कोमलाः॥ सुघनाः सरलाः वृत्ताः स्त्रीचोरंगुलयःश्रिये॥६५॥ तर्जनीमध्यमारंध्रेमध्यमा
नामिकांतरे॥ अनामिकाकनिष्ठांतच्छिद्रेसतियथाक्रमं॥६६॥ बाल्यतारुण्यवृद्धासुह्यवस्थासुयथाक्रमं॥ भोजनावसरेदुःखंकेप्याहुःश्री
मतामपि॥६७॥ अनामिकायांदीर्घायां विद्याभोगीभवेन्नरः॥ इतिमतांतरं॥ इदंतुपदविज्ञायमितिकेचित्॥६८॥ अपर्वेयस्यपर्वाणिदृश्यंतें
गुलिपर्वसु॥ संरक्तांगुलयोयेचतेसर्वेचिरजीविनः॥६९॥ यस्यहस्तेपदेदीर्घा अंगुलीमिलिताथवा॥ सपुमान्विरहीनित्यंह्रस्वांगुलिदरि
द्रता॥७०॥ अंगुलीदीर्घह्रस्वत्वेन आयुष्यप्रमाणं अग्रेपुरुषांगप्रकर्णेवक्ष्यति॥ अन्यः॥ करचरणांगुलयोद्व्ययोसुखीपस्तुतुल्याश्चेत्॥
भवतिसजारजातोदेवाद्दृष्टापितुर्मनुजः॥७१॥ नोजारजारजोयदिस्याज्जननीवातस्यजारसक्तास्यात्॥ परदारास्वनुरक्तःसहजादन्यस्यका
र्यनाशाकृत्॥७२॥ अथसांगुष्टांगुलिपर्वेषुशंखचक्रफलं॥ भाग्यवतांपचांगुलिशिरः सुसौख्यायदक्षिणावर्ताः॥ प्रायःपुंसांवामावर्ता
दुःखायपुनरेते॥७३॥ पंचांगुलीषुचक्राणिनरोनारायणःपरः॥ यस्याथचक्रमंगुष्ठेयवःपूर्णश्चदृश्यते॥७४॥ तदावैश्यजनानांचपूजितंध
नमाप्नुयात्॥ यद्वापितामहादीनां पूजितंधनमाप्नुयात्॥७५॥ तर्जन्यांयदिचक्रंस्यात्मित्रद्वाराधनंलभेत्॥ तेनैवविपरीतेनव्ययोभवति
निश्चितं॥७६॥ मध्यमायांस्थितेचक्रेदेवद्वाराधनंलभेत्॥ तेनैववीपरीतेनव्ययश्चकलहस्तया॥७७॥ अनामिकांस्थितेचक्रेनरोतिधन
वान्भवेत्॥ तेनैवविपरीतेन अनीतिनिपुणःसदा॥७८॥ पुराणे॥ पुराजालंधरंदैत्यंममापिपरिकंपनं॥ पदांकुगुष्टेरेखासुचक्रसुमहरद्धरः

ष्टादौनवृष्टिर्मध्यमान्यथा॥२०१॥ इतिवर्षज्ञफभाशफभज्ञानप्रश्नं॥ अथमुष्टिज्ञानप्रश्ने॥ एवंमासंतथापक्षंदिनंवेलाफलंतया॥भा
गस्पर्शेणविज्ञेयंग्रहलग्नविचारणात्॥२०२॥स्पष्टपर्वस्वरूपेणतथालग्नविचिंतनात्॥ग्रहस्वरूपमालोक्यमुष्टिज्ञानंनिवेद्यते॥२०३॥
अथनष्टवस्तुदिग्ज्ञानप्रश्ने॥नष्टंमेकगतंवस्तुइतिज्ञेयेकरंस्पृशेत्॥नष्टस्यपिनभंगभैदत्वायद्दिशिवस्तुभं॥२०४॥ अथनष्टवस्तुल
भ्यतेनवाप्रश्ने॥ वस्तुभंदक्षिणेभागे प्रतीच्यांत्रिपुराग्रगं॥ तदानलभ्यतेवस्तुमेरौप्राच्यांतुलभ्यते॥२०५॥ मध्यभेनगतंवस्तुकष्टाल्लु-
भ्यमुदग्दिशि॥ मायाजात्याचौरजातिर्वस्तुरूपंतुपर्वणा॥२०६॥ वयोपिचकनिष्ठादेःस्पर्शाद्बाल्यादिकंवदेत्॥भूतपंचकतःस्थानं
ज्ञायतेनष्टवस्तुनः॥२०७॥यामायास्पृशयतेतस्यास्तत्वपंचकमिष्यते॥ पृथिव्यांवाजलेनष्टं प्राप्यतेनातियत्नतः॥२०८॥ शेषमात्रंतु
दहनेपवनेव्योम्निनाप्यते॥ एवंतत्वात्तथालग्नान्नष्टप्राप्तिर्विचार्यते॥२०९॥ अथनिधानंक्वास्तिइतिप्रश्ने॥ निधानंक्केतिपृच्छायांत
लेहस्तेक्षणस्यभं॥ संस्थाप्ययत्रमूलंस्यात्तत्रस्यान्निश्चयाद्धनं॥२१०॥ क्रूरग्रहेणदृष्टेभेतद्धनंलभ्यतेनहि॥ सौम्येनलभ्यतेक्रूरा-
क्रांतेनास्तीतिनिर्णयः॥२११॥ अथगर्भप्रश्ने॥ गर्भप्रश्नेकरस्पर्शेसमांगुल्यांतुबालिका॥ पुत्रःस्याद्विषमांगुल्यांतलस्पर्शेनपुंसकं॥१२॥
अथस्वप्नप्रश्ने॥ भोजनंकीदृशंभोज्यं स्वप्नोवाकीदृशोमम॥ इतिज्ञेयेस्पृशेन्मायांसांगुष्ठंसाविचार्यते॥२१३॥ धातुमूलादिकंवस्तुत-
याकाम्दुधास्थितं॥लग्नंगृहांश्चविज्ञायवाच्यंसर्वज्ञफभात्रफभं॥२१४॥ अथस्वरः॥ बालःकुमारोथयुवावृद्धोमृत्कःस्वराःक्रमात्
॥ तारादिकामदोग्ध्रीषुगणेशेचव्यवस्थितः॥२१५॥ अथनासिकास्वरः॥ यातिथिर्यत्रभागेऽस्ति तारतम्यततोबुधः॥दर्शनात्स्पर्श
नाद्वापिगणयेद्गणकोत्तमः॥२१६॥सूर्योदयेघटीयुग्मस्थापनानुक्रमासुनः॥ रविःशशीचसूर्येंदुपरिपाटीसितेपरा॥२१७॥ सितपक्षे
शशिरविक्रमोऽयंतिथिसंगतः॥ कार्यस्ततोयदाहस्तदृष्टिःस्याद्घटिकाद्वये॥२१८॥तस्यस्वरस्याभ्युदयोवाच्यःस्पर्शनकर्मणि॥भा
गोयःप्राप्यतेतस्यस्वरस्योदयमादिशेत्॥ २१९॥ भाष्यं॥ यथाउदाहरणेसंवत्१७३७ आषाढसितद्वितीयायांसप्तमघटीसमयेकरे
क्षणेउदयिकीद्वितीयासागौर्याःमूलत्र्यंशोनामारभ्यततत्र्यंशात्॥घटिकाद्वयंप्रतित्र्यंशंयोज्यते॥एवंचसप्तमघटिसमयेप्राप्तश्चतुर्थ

गोपकसंकाशौर्नरवैर्भवतिपार्थिवः॥ वर्तुलैश्चतथैश्वर्यपुष्टितैःरसभोगवान्॥२॥ विलासे॥ नरवेषुबिंदवः श्वेताः पाण्योश्चरणयोरपि॥ आ
गतवः प्रशस्तास्युरिनिभोजनृपाभ्यदात्॥३॥ पुनर्नष्टत्वमाह॥ शूर्पाकारैरन्यथाभग्नैर्वक्रैः शुक्तिशिरायुतैः॥ प्रस्विन्नैःपांडुभिः स्नीक्ष्णैः पुरुषा
स्युःसुदुःखिताः॥४॥ अथयवचिन्हफलं॥ विलासे॥ यवैरंगुष्टमूलोत्थैस्तत्संख्यासूनवोनृणां॥ यवैरंगुष्टमध्यस्थैविद्यातिख्यातिभूतये॥
॥५॥ बहुनामथवैकस्ययवस्यस्यात्फलंशुभं॥ शुक्लपक्षेतथाजन्मदक्षिणांगुष्टगैश्चतैः॥६॥ कृष्णपक्षेनृणांजन्मवामांगुष्ठगतैर्यवैः॥ अ
त्रविशेषः॥ हस्तसंजीवने॥ विद्धाविद्धविवेकेनपक्षस्यव्यत्ययः क्वचित्॥७॥ अन्यच्चग्रंथांतरे॥ उभयोयदितेस्युश्चनोभयोर्यदिवापुनः॥ आपं
चम्यामेकादश्यांमध्येजन्मप्रकीर्तिताः॥८॥ दक्षिणेतुकरांगुष्टेयवोमध्येविराजते॥ दिवाजन्मविजानीयात्तस्यश्रेष्ठस्यधीमतः॥९॥ वामेरात्रौ
विजानीयात्नियतंपुरुषस्यहि॥ बहिर्मुखैर्बहिःकीर्तिःविपरीतंततोऽन्यथा॥१०॥ अल्पकीर्तिर्विकसितमुखैस्तुपरिकीर्तिताः॥ एकोप्यभि
मुखःस्वस्यर्यवःश्रीवृद्धिकारणं॥११॥ संपूर्णौकिंपुनस्तौद्वौपाणिमूलस्थितौनृणां॥ नानाभोगसुखासीनाःसमुद्रवचनंयथा॥१२॥ विराज
मानयवलांछनंचेदंगुष्टमध्येपुरुषस्ययस्य॥ भवेद्यशस्वीनिजवंशभूयोभूषाविशेषैः सहितोविनीतः॥१३॥ मध्यमायांयदियवादृश्यंतेते
सुशोभनाः॥ तदान्यसंचितंद्रव्यंप्राप्नोत्यंगुष्टगेयवे॥१४॥ सुतवंतोश्रुतवंतोजायंतेंगुष्टमूलजैश्चयवैः॥ मध्यगतैर्धनकांचनरत्नाढयभोगि
नःसततं॥१५॥ अंगुष्टस्योदरगतयवेधार्मिकःसत्यवादीदानातीक्ष्णश्चपत्लमतिमान्बंधुतोस्वल्पसौख्यः॥ कामीमानीविनयसहितो
राजसेवासमेतोल्लोकेल्लोकेपृथुधनयशानित्यदानैर्विशेषः॥१६॥ त्रिःपरिक्षेयामूलेंगुष्टगताभवतियस्ययवमाला॥ द्विपत्सुसमृद्धसपु
मान्राजावाराजसचिवोवा॥१७॥ यस्यद्विःपरिक्षेयासैवनरोराजपूजितःसःस्यात्॥ यस्यैकपरिक्षेयायवमालासोऽपिवित्ताढयः॥१८॥
अंगुष्टसंधिमूलेद्व्यखंडेसमफलंकेयवेयस्य॥ सैन्यंसंपत्तिर्भवेत्तस्यपरेरुत्सादितेभूमौ॥१९॥ यवाकृतिश्चेन्मनुजस्यरेखाअंगुष्टमध्यस्थ
लवासिनीस्यात्॥ यस्त्वाज्यदध्यादियुतोदत्ताशीगंगादिपुण्याःसरितःसयायी॥२०॥ अंगुष्टमूलेऽत्रयवोहियस्यभोगीसुखीस्याददतिकी
र्तियुक्तः॥ तन्मूलभागेयदिचांडजस्यान्मिष्टान्नभोक्ताकुलदीपदीपः॥२१॥ दक्षिणेतुकरांगुष्टेयवेविद्याप्रवर्तकः॥ उत्पन्नभोगीचनरोय

नेस्वाहेतिमंत्रतः॥ अभिमंत्र्यमहाब्रम्हस्पर्शनंज्ञानसाधनं॥ २३८॥ करस्पर्शात्स्पर्शादिवपरिणताकांचनमहारेसप्रेंखतूसिद्धिंसुगुरुव
चसोमेधविजयात्॥ विदित्वापृछायांयइहकुरुतेनिर्णयमहोमहोभिस्तस्यस्याद्भुवनभवनाभासनविधिः॥२३९॥ इतिप्रोक्तंमयाचात्रद्विविधं
प्रश्नलक्षणं॥ हस्तस्पर्शनस्पर्शाभ्यांचाग्रेरेखाविमर्शनं॥ २४०॥ इतिबृहज्ज्योतिषार्णवे षष्ठेमिश्रस्कंधेसामुद्रिकलक्षणाध्याये अष्टमेदर्शनस्प
र्शनाधिकारद्वयोपेतंहस्तसंजीवनप्रकर्णंप्रथमंसंपूर्णं॥ २४१॥ ॥ अथरेखाविमर्शनाख्यंद्वितीयप्रकरणंप्रारभ्यते॥ ॥स्वस्तिश्रीभरणंसि
द्धः करणंश्रीजगद्गुरोः॥ हस्तंस्वमस्तकन्यस्तंस्मृत्वारेखाविचार्यते॥ १॥ अथावलोकनेदिननिर्णयः॥ हस्तसंजीवने॥ प्रागुक्तविधिनाभ्येत्यन
रोज्ञानिगुरोःपुरः॥ हस्तंस्वंदर्शयेद्धस्तेप्रशस्तेदिवसोदये॥ २॥ शोभनेहस्तनक्षत्रेग्रहेसौम्येशुभेदिने॥ पूर्वान्हेमंगलैर्युक्तेपरिक्षेतविचक्षणः॥ ३॥
अथवामदक्षिणांगनिर्णयः॥ मणिबंधात्परःपाणिः सोऽकर्मकठिनोनृणां॥ वामोतिकोमलोवामभ्रुवांसंपत्करःकरः॥ ४॥ तथाच॥ वामभा
गेतुनारीणांदक्षिणेपुरुषस्यच॥ विलोक्यलक्षणंविज्ञैःपूर्यमायुःपुरःसरं॥ ५॥ विवेकविलासेपुनर्विशेषः॥ उत्पातःपिढकोलक्ष्मतिलकंम
शकोव्रणः॥ स्पर्शनंस्फुरणंनृणांशुभायांगेप्रदक्षिणे॥ ६॥ वामभ्रुवांपुनर्वामे ऽस्त्र्यंशाकल्पनरस्यच॥ धानोदक्षिणकेकैश्चिन्नरस्यांगेशु
भोमतः॥ ७॥ अन्यच्चविशेषः॥ यथैवदक्षिणे तद्वत्प्रायोवामेऽपिवीक्ष्यते॥ कृष्णपक्षेप्रजातस्यमुख्यंदक्षिणलक्षणं॥ ८॥ शुक्लपक्षेवा
महस्तलक्षणंमुख्यमीरितं॥ अनिर्णायहस्तवीक्षांपश्चात्साण्योःप्रधानता॥ ९॥ स्त्रियःस्त्र्यंशानरस्यापिफलंमुख्यंतुवामतः॥ एवंरात्रौ
दिनेजातस्त्रीन्नोःकेचित्फलंविदुः॥ १०॥ अथबालकेविशेषः॥ द्वादशाष्टानिरेखाणांनचस्पष्टताभवेत्॥ तत्परंत्रीणिवर्षाणिवा
महस्तेक्षणंशिशोः॥ ११॥ स्त्रीशात्वाद्बालकस्यापिसुभगस्यापिलोक्यते॥ वामहस्तात्फलंपंचदशवर्षाणिकेचन॥ १२॥ अथस्वभावब
लेनांगनिर्णयः॥ दक्षिणाद्बलवान्वामः पुंसःस्त्रीशीलशालिनः॥ नृशीलयाःस्त्रियावामाद्दक्षिणोबलवान्भवेत्॥ १३॥ अथपदार्थवशे
नांगनिर्णयः॥ स्त्रीमातृमातृपक्षादिगृहंक्षेत्रंचवाटिका॥ पुंसांवामकराद्वीक्ष्यंरात्रिःशुक्लश्चपक्षकः॥ १४॥ मृत्कःसुखंपितुःपक्षंधर्मंगं
धनमार्जवं॥ कृष्णपक्षोदिनंस्त्रीणांवीक्ष्यंदक्षिणपाणितः॥ १५॥ अथजन्मकालीनलग्नपरत्वेनांगनिर्णयः॥ स्त्रीलग्नेयेनराजातास्तेषां

थसामान्यतोरेखात्रयलक्षणंफलंच ॥ विलासे ॥ मणिबंधात्पितुर्लेखाकरभाद्विभवायुषोः ॥ लेखेद्वेयांतिनिस्रोःपितर्जन्यंगुष्टकांतरे ॥ ४४ ॥
येषांरेखाइमास्तिस्रः संपूर्णादोषवर्जिताः ॥ तेषांगोत्रधनायूंषिसंपूर्णान्यन्यथानतु ॥ ४५ ॥ गोत्ररेखाएवपितृरेखाइतिनामांतरंधनरेखायामातृरे
खेतिच ॥ हस्तसंजीवने ॥ हस्तेरेखात्रयंचैतत् विश्वत्रयमुदाहृतं ॥ पितृरेखोर्द्ध्वलोकःस्यात् मातृरेखाचमानवी ॥ पातालमायुरेखास्यादेतादं
क्षिणहस्तगाः ॥ धातुमूलंयथाजीवोवामेचैतद्विपर्ययं ॥ ४७ ॥ ब्रम्हाविष्णुशिवश्चासांक्रमतस्त्वधिनायकाः ॥ चतुर्दिक्षुतलस्याथशक्राद्या
अधिपादिशां ॥ ४८ ॥ पितृरेखाबाल्यवयस्तारुण्यंमातृरेखिका ॥ वार्द्धक्यमायुरेखायांवायुःपित्तंकफस्तथा ॥ ४९ ॥ चरस्थिरद्विस्वभावाःपुं
स्त्रीनपुंसकाभिधाः ॥ नभस्थलांबुचारिण्यःसत्वंरजस्तमःक्रमात् ॥ ५० ॥ यस्याःप्राधान्यमेतासुतस्यारूपंविनाशयेत् ॥ जीवस्यागमनंवामेगम
नंदक्षिणेकरे ॥ ५१ ॥ भाष्यं ॥ यदातिसृषुरेखासुपितृरेखाश्रेष्ठासुलक्षणानिर्दोषास्यात्तदाऊर्ध्वलोकांतरादागतोबोध्यइतिवामहस्ते ॥ दक्षिणहस्ते
तुऊर्ध्वलोकेगमिष्यतीतिनिर्णेयं ॥ एवंचराचरंज्ञेयंरेखाभिःसंप्रकाश्यते ॥ भूतंभवद्भविष्यद्यादीपिकाभिर्गृहंतथा ॥ ५२ ॥ ग्रंथांतरेत्रासांफल
निर्णयमाह ॥ शिवः ॥ गत्वामिलितयोःप्रांतेद्रव्यपित्रोश्चरेखयोः ॥ गृहबंधोविनिर्देश्योगृहभंगोऽन्यथाभवेत् ॥ ५३ ॥ अन्यच्च ॥ मणिबंधाभि
गच्छतिरेखायस्यप्रदेशिनीमूलं ॥ बहुबंधुजनाकीर्णतस्यपुनर्जायतेभिजनः ॥ ५४ ॥ अंगुष्टमूलमालंब्यवर्ततेसुंदराकृतिः ॥ यारेखापुत्रपौत्राणां
सप्ततिःपरिकीर्तिताः ॥ ५५ ॥ लघ्वापुनर्नराणांलघुरिहदीर्घोऽथदीर्घयावंशः ॥ परिभिन्नोविज्ञेयः प्रभिन्नयाछिन्नयाछिन्नः ॥ ५६ ॥ पितृरे
खागोत्ररेखाकुलरेखावेतिनामानि ॥ अन्यच्च ॥ पितृद्रव्यायुरेखासुकौमारंयौवनंजरा ॥ भूतंभविष्यकंचैववर्तमानंक्रमाश्रभं ॥ ५७ ॥ मा-
त्स्यः ॥ एकानिर्यकृत्तर्जनीयातिरेखातर्जन्यंगुष्टांतरालंतदन्या ॥ तद्देस्यानांआयुरैश्वर्यरेखेतत्सौंदर्यस्कंदरत्वंतयोःस्यात् ॥ ५८ ॥ धनरे
खायाएवऐश्वर्यरेखेतिनाम ॥ सामुद्रिके ॥ रेखायदिपितृसंज्ञानसंयुतामातृरेखयायदिवा ॥ नप्राप्तामणिबंधंयस्यसवैजारजातकोवश्यं
॥ ५९ ॥ एवमेवजगन्मोहनेअग्निपुराणेचप्रतिपादितं ॥ अव्यक्ताःस्युःस्तनवःखंडारेखाकरेस्थितायस्या ॥ निम्नांशोरविरजनीश्रितस्यपलाय
तेसततं ॥ ६० ॥ पूर्वोक्तंरेखायाः शुभाशुभलक्षणअत्रापिबोध्यं ॥ कनिष्ठायांस्थितारेखासंज्ञायाबतिकास्मृताः ॥ करमध्यगतारेखाकरमूर्ध्नी

भवेद्यदि॥६१॥ नृपोवानृपतुल्योवा ख्यातश्चधनवान्भवेत्॥ एकयानृपतिर्मंत्रीद्वाभ्यांख्यातः स्त्रयेणहि॥६२॥ गोत्ररेखाथयस्यस्यादखंडा
वेधवर्जिता॥ गोत्रेसमुख्यतांयानिसर्वेषामाश्रमःपुमान्॥६२॥ संजीवने॥ पितृरेखामातृरेखामिलनेगृहबंधकः॥ कलत्रमित्रसंबंधोवा
मेतत्संगमेकरे॥६३॥ धनरेखायस्यदीर्घातस्यधान्यंमहाद्भुतं॥ भिन्नारेखाभवेद्भिन्नंद्रव्यंव्ययसमाकुलं॥६५॥ नतिष्ठतिचिरंकालंत्रिशू
लस्थानेरेखया॥ मध्यत्रिशूलेदुर्द्रव्यंछलदद्मातिसंभवं॥६६॥ अन्यत्प्रकारांतरं॥ अंगुष्टसन्मुखाःसर्वद्रव्यसंपत्तिकारिणः॥ मातृरेखापह्लु
वैस्तैर्ह्लभ्यंमातुलवर्गतः॥६७॥ आयुरेखासन्मुखैस्तैर्नलभ्यंमातृपक्षतः॥ कनिष्ठानामिकायोगेस्नेहःस्यात्स्वजनैर्दृढः॥६८॥ सांतरत्वेऽनयोः
प्रीतिःछेदस्यादंतरातरा॥ छिद्रांगुलीभिर्दारिद्रंसांद्राभिर्धनवान्भवेत्॥६९॥ अन्यच्च॥ अस्ताचलाद्व्ययेरेखारक्तखंडाधनप्रदा॥तस्यां
चेत्पह्लुवीजीवरेखामुख्याअपत्यदा॥७०॥ अंगुष्टसंमुखायेतेतावद्धारंधनार्जनं॥ तस्याछेदेराजदंडश्चौराद्धानिस्तुवधनः॥७१॥ अन्यच्च॥ अ
र्थरेखात्वनिच्छिन्नादंपत्योःरिष्टदायिनी॥ अन्यथाकलहोवास्यान्पंचतायाभवेद्ध्रुवं॥७२॥ यस्यार्थरेखामिलितानरस्यजायानुकूल्यंमह
दुःखिनस्य॥ भिन्नाभवेत्सायदिबद्धवैरानितंबिनीपापमतिःसदैव॥७३॥ ऐश्वर्यरेखात्रिखरेणमूलाद्युनक्तियासोपितृवंशरेखा॥ निरंध्रवं
धागृहबंधनायबलीयसीवंशविवर्द्धनाय॥७४॥ अलिखितंकाकपदंधनरेखायांतुदृश्यतेयत्र॥ अर्जयतिधनानिपुनस्तल्लक्षणमपिस्वव्ययंकुरुते
॥७५॥ अथचतुर्थिऊर्ध्वरेखानिर्णयः॥ विवेकविलासे॥ ऊर्ध्वरेखामणीबंधादूर्ध्वगासातुपंचमा॥ अंगुष्टाश्रयिणीसौख्यराज्यलाभा
यजायते॥७६॥ राजाराजसदृशोवातर्जनीगतयानया॥ मध्यमांगतयाचार्यःख्यातोराजाथसैन्यपः॥७७॥ अनामिकाप्रयांत्यातुसार्थ
वाहोमहाधनः॥ कनिष्ठांगतयाश्रेष्ठःसुप्रतिष्ठिर्भवेद्ध्रुवं॥७८॥ अन्यच्च॥ रेखामणिबंधाद्यदियात्यंगुष्टप्रदेशिनीमध्यं॥ ऋद्धिस्तुनंसार
चयतिविज्ञानविचक्षणंपुरुषं॥७९॥ नछिन्नानस्फुटितादीर्घतरायद्यपह्लुवापूर्वा॥ ऊर्ध्वारेखाकुरुतेसहस्रजनपोषमेकोऽपि॥८०॥
साब्रम्हणस्यवेदकरीक्षत्रियस्यराज्यकरी॥ वैश्यस्यमहार्थकरीसौख्यकरीभवतिशूद्रस्य॥८१॥ कनिष्ठांगतयामर्त्योधनधान्ययशान्वितइ
तिवा॥८२॥ कस्योर्ध्वरेखानकरोतिराज्यंहस्तांतगामत्स्यपताकसंवृता॥ विद्यान्वितोवाहनभृत्ययुक्तःकुलेनृपालःकुलवृंदनाथः॥८३॥

ग्रंथांतरे॥ वायव्यकोणादारब्धास्वार्जितायप्रकीर्तिता॥ मातृमूलेप्रयांत्यातु तस्यचोत्पात्तिकंधनं॥८४॥ अथतस्याएवमतांतरेणपंचधाफ
लमाह॥ अंगुष्टभागाश्रयणीसचैवपृथ्वीपतिर्वापृथिवीशपूज्यः॥सायातिमध्यांयदिचेत्तदानीमाचार्यवर्यंजनयेन्मनुष्यं॥८५॥ अनामिकायां
प्रतियातिचेत्साताता नादिवित्तानि भुनक्तिनूनं॥ कनिष्ठिकायांप्रतियातिचेत्सानरोऽर्थहीनोबहुसंततिःस्यात्॥८६॥ त्यक्ताधोमणिबंधंयारेखास्या-
त्करगामिनी॥ सुवर्णरत्नराजश्रीदायिनीसानसंशयः॥८७॥ अन्यच्च तस्यादीर्घत्वेफलं॥ऊर्ध्वरेषांकरेयेषांयदिस्याद्देशुलत्रयं॥ नानाभोग
सुखासीनोसमुद्रवचनंयथा॥८८॥ उर्ध्वरेखाकरेस्पष्टा तथापादतलोपगा॥ राज्यंभुक्त्वानवत्यंतेरवड्गेनास्त्रंव्रजेनसः॥८९॥ अथत्रायः
दीर्घरेखानिर्णयः॥शिवः॥ पूर्वमायुःपरिक्षेतपश्चाल्लक्षणमेवच॥आयुर्हीनानरानार्योंलक्षणैकिंप्रयोजनं॥९०॥ वामभागेनुनारीणांद
क्षिणेपुरुषस्यच॥ वराहः॥रेखाप्रदेशिनीगताशतायुषंकल्पनीयमूनाभिः॥ छिन्नाभिर्द्रुमपतनंबहुरेखारेखिणोनिस्वाः॥९१॥ तिस्रोरे-
खाशतजीविनांललाटायताःस्थितायदि॥ चतस्त्रभिरवनीशत्वंनवतिश्चायुःसपंचाब्दाः॥९२॥ हस्तसंजीवने॥ यावत्योंगुलयोलंघ्यामू
लाज्जीवितरेखया॥तावंत्यःशारदाज्ञेयाः पंचविंशतियोबुधैः॥९३॥ कालहानितयापश्चाज्ज्ञेयाविंशतयोपिच॥ आयुरेखास्वरूपाच्च अ
ल्पमृत्युर्विचार्यते॥९४॥ अन्यच्च॥ कनिष्ठांगुलिदेशाच्चरेखागच्छतितर्जनी॥ अविच्छिन्नानिवर्षाणि शतमायुर्विनिर्दिशेत्॥९५॥ क
निष्ठांगुलिदेशाच्चरेखागच्छतिमध्यमां॥ अविच्छिन्नानिवर्षाणिसाशीत्यायुर्विनिर्दिशेत्॥९६॥ कनिष्ठांगुलिदेशाच्चरेखागच्छत्यना
मिकां॥ अविच्छिन्नानिवर्षाणि षष्ठिरायुविनिर्दिशेत्॥९७॥ कनिष्टांगुलिदेशाच्चरेखातत्रैवगच्छति॥ त्रिंशाद्द्वाविंश।वर्षाणितस्यायुः
परिकीर्तितं॥९८॥ तथाचहस्तसूत्रं॥ हस्तचिन्हंप्रवक्ष्यामिगुरूक्तंश्रद्धयान्वितं॥ लक्षणैर्ज्ञायतेसद्यो जीवितंचशुभाशुभं॥९९॥ आ-
युरेखान्ततर्जन्यांतस्याब्दशतमायुषः॥ वेध्यारेखाभवेद्यस्यवक्ष्यतेतस्यलक्षणं॥२००॥ वामेवामेत्रवेधेनजलेमृत्युंसमादिशेत्॥ रेखासर
लवेधेनशस्त्रेणमृत्युमायुदिशेत्॥२०१॥ दक्षिणेदक्षिणेवेधेवन्हिसर्पभयान्मृतिः॥ वामदक्षिणपार्श्वस्थाद्वेधान्मृत्युर्महारुजः॥२॥ अन्यच्च॥
अंगुष्टादौशत्रुहांतेदेवतस्याल्लयंभवेत्॥ लक्षणंतस्यवक्ष्यामिमृत्युर्येनेहबोध्यते॥३॥ तस्यमध्योन्नतारेखा विदग्धैर्ज्ञायतेसदा॥ हताशके

कोद्दाभ्यांचत्रिभिःसहमृतिर्जनैः॥ ४॥रेखाभिस्तिसृभिर्नृणांजलेमृत्युश्चनान्यथा॥ चतुर्थ्यारेखयाशत्रुरणमध्येमृतिर्भवेत्॥५॥अन्यच्च॥
प्रांतेजीवितरेखायास्तिर्यग्रेखायदाभवेत्॥ तदाश्वासतितोज्ञेयःसाश्यामाचेत्खराद्भयं॥६॥ आयुरेखातलेवक्रायारेखांकुशवद्भवेत्॥ तदाह
स्तिभयंविद्याद्रेखाछिद्रेजलाद्भयं॥७॥ आयुरेखामध्यभागेऽभेरेखेव्यवस्थिते॥ एकादीर्घालघुश्चैकातदोर्ध्वेनिपतेद्गृहात्॥८॥ आयुरेख
तलेरक्तंतदारक्तविकारतः॥ गंडव्रणादिघातोवातनद्दर्षागमेभवेत्॥९॥ आयुरेखांतरेशुक्लाबिंदवःसन्निपाततदा॥ अग्निभीबिंदुभिःरक्तैः
श्यामैर्बंदिभयंभवेत्॥१०॥ आयुरेखांतराछेदेजलाद्दाज्वलनाद्भयं॥ स्त्रीप्रसंगादपयशस्तथाल्पमृतिसंभवः॥११॥ हस्तसंजीवने॥ चतुष्किकास्या
दंगुष्ठेपितृरेखांतरेयदि॥ तदावृश्चिकदंशःस्यात्दंष्ट्रायांदंष्ट्रिणोभयं॥१२॥ करभाद्दाचतुष्काधोभागानष्टौप्रकल्पयेत्॥ यथाप्रंतनुरेखायाम
द्योल्लंघनतःशतं॥१३॥ एवंचतत्सुनिर्व्यूढंज्ञेयाविंशतयोऽपिच॥ कालिहानिनयापेक्षमित्युक्तंसूत्रतःपुरा॥१४॥ विवेकविलासे॥ मणिबं
धोन्मुखायायुर्लेखायांयेऽत्रपल्लवाः॥ सपदस्तेबहिर्यानाविपदांगुलिसंमुखाः॥ २१५॥ पूरोक्तवराहवचनाद्विशेषमतांतरमाह॥ शिवः॥ ल
लाटेयस्यद्वन्द्वयंतेरेखात्रिंशैककंक्रमात्॥ षष्टिश्चचत्वारिंशाच्च विंशतिश्चयथाक्रमं॥२१६॥ ललाटेयस्यद्वयंतेशुभेरेखाचतुष्टयं॥ असीत्या
युर्विनिर्दिष्टं पंचरेखाशतंभवेत्॥१७॥ महाकर्णोमहानासोमहापादोदरस्तथा॥ सुबाहुर्दृढनेत्रश्चतेनरादीर्घजीविनः॥१८॥ अतिमेघातिकी
र्तिश्चसुंदरोऽतिसुखीनथा॥ अतिस्निग्धानिदृष्टिश्चतेनराःस्वल्पजीविनः॥१९॥ सामुद्रिके॥ यामन्मात्राछेदाःजीवितरेखास्थिताभवंतिनृणां
॥ अपमृत्यवोऽपितावन्मात्राःनियतंपरिज्ञेयाः॥२०॥ भविष्योत्तरे॥ यस्यपाणितलेरेखाकनिष्ठामूलसंभवा॥ गताप्रांतंप्रदेशिन्याःसजीवेच्छ
रदांशतं॥२१॥ स्कांधे॥ अच्छिन्नातर्जनीयावत्तथारेखाचदृश्यते॥ कनिष्ठापृष्ठनिर्यानादीर्घायुष्यंतथार्पयेत्॥ २२॥ तथाचसमुद्रः॥ क
निष्ठांतर्जनींयावत्रेखागच्छतिचाक्षता॥ विंशत्यष्टाधिकशतंनरोजीवत्यनामयं॥२३॥ ननुशतायुर्वैपुरुषइतिश्रुत्याशतायुरेवोक्तं कथम
त्राधिकायुःकथनंउच्यते॥ शताधिकंस्यापिश्रवणात्॥ तयाचश्रुतिः॥ साग्रंवर्षशतंजीवेतिसपादशतं॥ २४॥ अन्यच्चपूर्वोक्ताद्विशेषः
कनिष्ठांगुलिमूलात्तुरेखागच्छतिमध्यमां॥ अविच्छिन्नानिवर्षाणिषष्ठिरायुर्विनिर्दिशेत्॥२५॥ कनिष्ठानामिकांयावद्रेखागच्छतिचाक्ष

ता॥ षष्ठिपंचाशतंवापिचत्वारिंशन्नसंशयः॥२६॥ कनिष्ठांगुलिमूलात्तुरेखाक्कापिनगच्छति॥ आयुस्तत्रविजानीयाषष्ठेरब्दैर्नसंशयः॥२७
॥ कनिष्ठामध्यमायावत्रेखागच्छतिचाक्षता॥ शताब्दंचाप्यथाशीतिंनरोजीवेन्नसंशयः॥२८॥ तथाचनारदः॥ अनाम्यास्त्रिंशदित्याहुस्त
दंतेषष्ठिरुच्यते॥ मध्यमासप्ततिःप्रोक्तातस्याग्रेशीतिरुच्यते॥२९॥ कनिष्ठाख्यादशाब्दानितस्यायुःपरिकीर्तितं॥ आयुरेखाभवेद्यस्यदीर्घास
सुंदरासमा॥ नक्कापितृटितेछिन्नासतीर्थेम्रीयतेनरः॥ ज्ञेयंतृटितछिन्नाभ्यांमरणंकृच्छ्रपीडनात्॥३१॥ रेखासपल्लवायस्यसव्ययीकुरुतेधनं॥ कु
मार्गेणनरोविंद्यादितितत्वमुदाहृतं॥३२॥ अत्रायुरेखधनं अन्यच्चप्रकारांतरं॥ याम्योच्छ्रायांगुलाःसप्तरेखावृक्षनिभाभवेत्॥ नरोवर्षशतंजीवे
दायुष्मान्नात्रसंशयः॥३३॥ यस्यरेखांगुलाषट्चखड्गाकारासुशोभना॥ नरोनृपतिपूज्यश्चनवत्यब्दानिजीवति॥३४॥ यस्यरेखांगुलापंच
रेखाभवतिशोभना॥ कृषीभागीभवेद्विद्वान्पंचाशीतिःसमाभवेत्॥ समरेखाभवेत्सूक्ष्मायस्यसाचतुरंगुला॥ दयान्वितोऽपिधनवान्शाष्ठि
रब्दानिजीवति॥३६॥ तिस्रःसर्वांगुलीरेखाज्ञानीशीलःसुधार्मिकः॥ शतार्द्धंजीवतेनित्यंबहुवित्तस्यभाजनः॥३७॥ अंगुलद्वयमानेनत्रिं
शद्वर्षाणिजीवति॥ यस्यरेखाकरतले अंगुलैकप्रमाणतः॥ समृत्युकवशावर्तीचदशाब्दैर्गतोभवेत्॥ यस्यांगुलार्द्धदृश्येतअर्द्धखंडियुता
भवेत्॥३९॥ दुःखितोद्यूतसक्तश्चमृत्युकसंस्थेचसप्ततिः॥ गर्गः॥ रेखाकनिष्ठिकायांतुछिन्नायदिभवेत्पुनः॥४०॥ तस्यमृत्युकंवि
जानीयान्नदीमध्येसमुद्भवः॥ तन्मध्येयद्भवेच्छिद्रंतोयेमृत्युकपदंस्मृतं॥४१॥ ऊर्ध्वरेखाभवेच्छिन्नागणेहिविनिपातकृत्॥ अनामिकायांवि
ज्ञेयंतस्करोविनिपातकृत्॥४२॥ अनामिकायांविज्ञेयंतस्करस्यविपातकृत्॥ श्रीरेखाभ्यंतरेरेखांदृष्ट्वाशत्रुभयंभवेत्॥४३॥ ऊर्ध्वरेखातुदृश्ये
तआयुष्योपरिसंस्थिता॥ शस्त्रहस्तगतोनित्यंभयंचैवनजायते॥४४॥ बहुरेखाभिरुच्छिन्नाह्यकालमरणंभवेत्॥ अत्रआयुरेखायायाव
तः छेदास्तावंतोअपमृत्यवःउपरिछेदेरोगः अधःछेदेशस्त्रभीतिः तत्तच्छेदानुगुणोदशारिष्टवत्॥ अपमृत्युकस्तरुपातः शस्त्रभीतिरुनां
गतावानिर्देश्येतिसंप्रदायः॥ दशारिष्टंनामज्ञातायुषः आयुर्लेखायाश्चदशभागाः कल्पनीयाः तत्रयस्मिन्रेखाभागेरेखाछेदस्तदायु
र्दशाभागेदुष्टंफलंकल्पनीयमित्यर्थः॥४५॥ अथस्त्रीयआयुषविषयेपिपूर्वोक्तमेवसर्वयोजनीयं॥ भट्टोत्पलश्च॥ कनिष्ठामूलसंभूताग

तामध्यमिकांतरं ॥ प्रदेशिन्याश्चसारेखायस्याः सादीर्घजीवनी ॥ ४६ ॥ पुरुषश्चस्त्रियश्चापिदक्षवामप्रभेदतः ॥ एवमायुः परीक्ष्यादौप
श्चादर्थपरीक्षयेत् ॥ ४७ ॥ इति आयुष्यनिर्णयः धननिर्णयस्तुपूर्वमेवउक्तः ॥ मुख्यारेखाइमास्तिस्रः सहिताऊर्ध्वरेखया ॥ रेखाचतुष्टय
मिदंप्रकीर्णकमतःपरं ॥ ४८ ॥ इतिमुख्यरेखाचतुष्टयफलनिर्णयाधिकारः ॥ ॥ अथप्रकीर्णरेखाफलाधिकारःप्रोच्यते ॥ ॥ अथ
तत्रादौभार्यापतिरेखयोःनिर्णयः ॥ हस्तसंजीवने ॥ स्त्रीरेखावामहस्तेस्यादायुरेखास्वभावतः ॥ दक्षिणैःपल्लवैस्तस्यांसौख्यंदुःखंतुवामगैः
॥ ४८ ॥ आयुर्लेखाकनिष्ठांतेर्लेखाःस्युर्गुणिणीप्रदा ॥ समाभिसच्छुभशीलास्ताःविषमाभिःकुशीलकाः ॥ २४९ ॥ संजीवने ॥ दीक्षारे
खाबलवतीपुरःस्याचेन्महत्तरा ॥ बाधयेद्दाररेखांयांसातदामित्रोदयंवदेत् ॥ ५० ॥ तारामूलान्मणिंयावद्रेखायत्संख्यास्फुटः ॥ तावती
र्महिलाःतस्यराजयोगेविनिर्दिशेत् ॥ ५१ ॥ अन्यच्च ॥ पितृरेखांगुष्ठरेखांतरेयाःऊर्ध्वरेखिकाः ॥ तत्संख्यादारभोगःस्याद्द्धेक्लेशश्चतद्भवः
॥ ५२ ॥ पितृरेखामित्येतत्सूत्रंस्वपरस्त्रीभोगपरंनपुनःपरिणयनादिसंस्कारप्राप्तास्त्रीविषयंकिंचपुनरपिराजयोगेभार्यारेखाउक्तंशैवसामु
द्रिकेदशमाध्याये ॥ ५३ ॥ स्युर्यावंत्यांतरेरेखामणिजीवितरेखयोः ॥ तावंत्योमहिलास्तस्यस्त्रियस्तावन्मिताःप्रियाः ॥ ५४ ॥ स्त्रियःदक्षिण
पाणिस्थापतिरेखाप्रकीर्तिता ॥ आयुरेखात्रतद्भेदेयोगःस्याद्विधवाकरः ॥ ५५ ॥ तदावामकरेतारामूलादोमणिबंधनं ॥ रेखायावंत्यऊर्ध्वा
स्त्रियस्तावंतईश्वरः ॥ ५६ ॥ यदुक्तं ॥ पुष्टंयदेवदेहेस्याद्दक्षणंवाप्यलक्षणं ॥ इतरद्बाध्यतेतेनबलवत्फलदंभवेत् ॥ ५७ ॥ तथाचयोगिप्रभु
तेर्यस्यस्त्रीसंगमोनहि ॥ दाररेखामित्रकरीवामेरेखाप्रभुत्वकृत् ॥ ५८ ॥ लक्ष्मीराज्यंवाहनादिनृणांवामकरादिह ॥ ज्ञानमैश्वर्यवंशादिवी
क्ष्यंदक्षिणपाणितः ॥ ५९ ॥ योगिन्यानसुखंपत्युस्तस्यादक्षिणपाणितः ॥ ज्ञानंयात्रातपःशौचंगुरुसौख्यंनिरीक्ष्यते ॥ ६० ॥ ग्रंथांतरे ॥
रेखाकनिष्ठिकायुर्लेखामध्येनरस्ययावंत्यः ॥ तावंत्योमहिलास्युर्महिलायाःपुनरपिमनुष्याः ॥ ६१ ॥ रेखाभिर्विषमाभिर्विषमाःस
माभिरथसमशीलाः ॥ हीनतराहीनाभिःध्रुवमधिकतराःसमधिकाभिः ॥ ६२ ॥ पुष्टाभिर्हिपुनर्भूकन्यारेखाभिरथसुदीर्घाभिः
॥ सुभगाःसूक्ष्माभिःस्यात्स्फुटिताभिर्दुर्भगानारी ॥ ६३ ॥ स्त्रीरेखागताऊर्ध्वापल्लवाःप्राङ्मुखायदि ॥ संकष्टेनविवाहोस्यभंगोवातस्य

जायते॥६४॥ स्त्रीरेखागताऊर्ध्वाः पल्लवाः प्राङ्मुखायदि॥ एकत्रनिश्चयेजातेह्यपरादीयतेस्यवै॥ ६५॥ इतिभार्यारेखा॥ ॥अथसंतानरे
खा॥ विवेकविलासे॥ अपत्यरेखासर्वास्युर्मत्स्यांगुष्टतलांतरे॥ यवैरंगुष्टमूलोत्थैस्तत्संख्यासूनवोनृणां॥६६॥ ग्रंथांतरे॥ मूलेंगुष्टस्य
नृणांस्थूलारेखाः भवंतियावंत्यः॥ तावंत्यः पुत्रास्युः सूक्ष्माभिः पुत्रिकास्ताभिः॥६७॥ वराहमिहरोपि॥ अंगुष्टमूलरेखाः पुत्राः स्युर्दा
रिकाः सूक्ष्माः इति॥६८॥ अथमतांतरंहस्तसंजीवने॥ मणेः स्वभावरेखांतरेखाभिः करभेनृणां॥ अपत्यसंख्यानिर्देश्यासंप्रदायमताश्र-
यात्॥६९॥ यदुक्तंहस्तबिंबे॥ यावंत्यः करभेरेखाऊर्ध्वेतावदपत्यदा॥ समानांकेतदाद्यास्त्री विषमांकेनरंवदेत्॥ ७०॥ अन्यत्रापि॥ पु
त्रदाः करभेरेखाकनिष्ठाधः कलत्रकृत्॥ अंगुष्टमूलेरेखास्तु भ्रातृभांडानिशंसति॥ ७१॥ मलेरंगुष्टमूलांतं यारेखास्तलसंमुखा॥ सूक्ष्मा
स्ताहिभगिन्यः स्युः भ्रातरः स्थूलरेखिताः॥७२॥ अत्रसंतानभ्रातृरेखयोः परस्परंमहद्विरोधेसत्यपि अंगुष्टमूलेऽपत्यरेखा करभेसहोदररेखामुख्या
॥ यतश्चोक्तं॥ अपत्यरेखाः सर्वाः स्युर्मत्स्यांगुष्टतलांतरे॥ हस्तचिन्हेष्व्येतदेवसंमतंविदुषांमते॥ ७३॥ हस्तबिंबे॥ योगिनांतनयस्थानेशिष्यप्रा
प्तिर्विचार्यते॥ पत्न्यः स्थानेऽथयोगिन्या धर्मयोगमठाश्रमः॥ ७४॥ संजीवने॥ अंगुष्टमूलादारभ्यमणेरवधिकंदगाः॥ यावंत्योरेखि
कास्तावत्यपत्यानिविचारयेत्॥ ७५॥ पुत्रास्तुदीर्घरेखाभिर्लघुभिर्दारिकामता॥ जीवनंमरणंत्वेषामभेदाद्भेदतः स्मृतं॥ ७६॥ कनि
ष्ठिकाजीवितरेखयोस्यान्मध्येमिथः कांतकलत्ररेखा॥ अपत्यरेखाकरभेपरस्मिन् भवंतिताः मातुलवर्गरेखाः॥ ७७॥ बंधुरेखांव
दंत्येके निर्णयंतद्गुरोर्गिरा॥ ७८॥ अथभ्रातृभगिनीरेखा॥ विवेकविलासे॥ आयुर्लेखावसानाभिर्लेखाभिर्मणिबंधतः॥ स्प-
ष्टाभिर्भ्रातरोस्पष्टतराभिर्जामयः पुमान्॥ ७९॥ अस्पष्टाभिरदीर्घाभिर्भ्रातृजाम्यायुषस्त्रुटिः॥ तासुयाअस्फुटारेखास्तावंतो
निधनंगताः॥८०॥ याः स्फुटातेथजीवंतइतिसामुद्रिकंवचः॥ अत्रविशेषसंजीवने॥ यावंतः पल्लवास्तस्यांमायास्तन्मुखगामिनः
॥८१॥ तावंतः पितृद्रव्यस्यभवेयुर्भागहारिणः॥ किंच॥ यावंतः पल्लवाः राज्ञोभिमुखास्तेप्रियंवदः॥ भ्रातरः स्वजनाः कार्ये पुंसः सा
हाय्यकारिणः॥ ८२॥ ग्रंथांतरे॥ यावंत्योमणिबंधायुरेखांतः प्रतिष्ठिताः स्थूलाः॥ तावत्संख्याभ्रातॄन् वदंतिसूक्ष्माः पुनर्भगिनीः॥८३॥

रेखाभिश्छिन्नाभिभिन्नाभिर्भाविमृत्यवोज्ञेयाः॥ यावंत्यस्ताःपूर्णाः नियतंजीवंतितत्सेरेखाभिः॥८५॥ अथपुण्यधर्मरेखानीर्थरेखा॥ त्रिवः॥
अनामिकांत्यपर्वस्थाः प्रनिरेखा प्रभुत्वकृत्॥ ऊर्ध्वीपुनस्तलेनस्याधर्मरेखेयमुच्यंत॥८६॥ रेखाभ्यांमध्यमास्थाभ्यामाभ्यांप्रोक्तविपर्ययः॥ह
स्तसंजीवने॥ त्रिवाधस्थाधर्मरेखामध्यतोजीवितोन्मुखी॥ कथयेदुदरेपीडामाद्याधःस्थावुदीक्षणं॥ हस्तचिन्हेतुविकल्पः॥ मध्यांगुलीमूल
गताधर्मरेखेनिवेदिता॥८८॥ सामुद्रिके॥ आयुर्लेखानामांगुलिमूलांतर्गताभवेदूर्ध्वा॥ यस्यव्यक्तारेखासधर्मनिरतःसततं॥८९॥ अनामि
कामूलगताप्रशस्तासाकीर्तितापुण्यविधानरेखा॥ अनामिकामध्यमपर्वसंस्थारेखोर्ध्वगाचेत्फलमत्रमुह्यं॥९०॥ तीर्थरूपःसविज्ञेयःख
ड्गेनास्तंगमिष्यति॥ सेवतीर्यन्यदातत्रतीर्थेसौपंचतामियात्॥९१॥ तथैवमध्यपर्वस्थाऊर्ध्वरेखाऊर्ध्वरेखाभवेद्यदि॥ सुकृतिःसतुविज्ञेयः
दाताश्रीकृष्णसेवकः॥९२॥ इदंतुलक्षणेवामेकरेनामांतरेविभो॥ तस्यभार्याशुभासाध्वीतीर्थेसमृत्कमाप्नुयात्॥९३॥ अन्यच्च॥ अनामिका
मूलविभूषणंस्यात्सपुण्यरेखानदवास्तिहेतुः॥ निःसीममास्तितिपंचशाखाः कस्योर्द्ध्वरेखानकरोतिराज्यं॥९४॥ हस्तसंजीवने॥ मध्यमांगुली
मूलगताधर्मरेखानिवेदिता॥ वज्रंरेखाभवेद्यस्यस्यश्रद्धाधार्मिकोहिसः॥९५॥ वज्रंअनामिकामूलेतत्रनिष्ठाविधायकं॥ तस्मिन्भिन्नेभवेद्देहे
मध्येरेखात्रमध्यमा॥९६॥ अथविद्यारेषायत्रारेखा॥ हस्तसंजीवने॥ त्यक्तोर्ध्वमणिबंधंयारेखाचोत्तरगामिनी॥ यत्रोददानिसापुंसांश्रीदा
यिकानसंशयः॥९७॥ इयमेवविद्यारेखा॥ अन्यच्च॥ विद्यारेखानुकरभान्निर्गनाकोशासंमुखी॥९८॥ अगमागधिभाषाप्रकरणमते॥
मणिबंधाउंपयद्दा कणिठाजावंजागयां॥ रेहांसाकुणइजससमिद्धंसिद्धिंबहुवित्तसंजुत्तं॥९९॥ कनिष्ठायदिदीर्घास्यादूर्ध्वरेखासमाश्रि
ता॥ व्यवसायात्तदालाभोयद्वास्तस्यमहोज्वलः॥१००॥ अन्यच्च॥ गोत्ररेखाधनरेखांतरालेकोशाईरितः॥ आयुर्धनांतरेभोगोयत्रांगुष्टांत
पूर्वगं॥१॥ अधोंगुष्टाद्दोत्ररेखोपरिष्टाद्यास्तिरःस्थिता॥ नारेखापट्टदायिन्योविद्यादायिन्यएवच॥२॥ अंगुष्टेषुर्यवैर्भाग्यंविद्याचांगुष्टमूल
जैः॥ वर्द्धाकारापुनःपाणितलेरेखामहाश्रियै॥३॥ अथकाकपदफलं॥ विवेकविलासे॥ अंगुष्टस्यतलेयस्यरेखाकाकपदाकृतिः॥ तस्य
स्यात्पश्चिमेकालेविपत्तिःशूलरोगतः॥४॥ इत्यकक्षास्थानांतरेऽपिकाकपदफलमाह॥ ग्रंथांतरे॥ सर्पमुख्यायुवोरेखानथाकाकपदाकृतिः

परिक्षेयाकरेयस्यदारिद्रस्यससेवकः॥५॥ क्वधनंकन्नारीरंचक्कसुतंकसुखःसुहृत्॥ करेकाकपदंयस्यरेखाफणिफणाकृतिः॥६॥ अथके
दाररेखा॥ संजीवने॥ अंगुष्टमध्येकेदारेसुखंराज्यश्रियोऽथवा॥ केदारेसंगतारेखास्तावद्वंधनकारणं॥७॥ अथभाग्यरेखा॥ कनिष्ठातोसं
आयुरेखासंमुखायात्ररेखिका॥ साभाग्यरेखाकथितानिर्वधास्करवकारिणी॥८॥ अथमृत्युग्रथिलरेखे॥ मृत्युरेखांविजानीयात्समुद्रात्करभो
न्मुखी॥ तदभोपिद्वितीयायाग्रथिलंकुरुतेजनं॥९॥ अथमित्ररेखा॥ करभाच्चकनिष्ठाधःस्त्रीरेखांबुधिसन्मुखी॥ मित्ररेखापिसैवोक्तास्फुटिना
किंचिदानने॥१०॥ अथपदरेखा॥ शिवाधस्तनुरेखांतस्तिर्यग्सापददायिनी॥ अंगुष्टपितृरेखांतस्तिर्यग्रेखेतिकेचन॥११॥ अथपट्टरेखा॥ अंगुष्ट
मूलेयाऊर्ध्वारेखाःस्त्रीसंगमप्रदाः॥ तिरश्चीनापट्टरेखामतमेनक्वचिन्मतं॥१२॥ अथाश्वपालरवीरेखा॥ समुद्रान्निर्गतागोत्ररेखांतर्नृपमूल
गाः॥ वक्राश्वरेखानिर्दिष्टासमापर्यंकिकांदिशेत्॥१३॥ अथयात्रारेखा॥ यात्रारेखांगुष्टमूलान्निर्गतापितृसंगता॥ स्थूलसूक्ष्मादिभि
देनसिद्धासिद्धिर्विनिर्दिशेत्॥१४॥ अथबाणप्रहारोदरव्यथारेखा॥ विद्यामण्योरंतरालेयारेखावक्ररूपिणी॥ बाणप्रहारंकुरुतेसमोद
रगलव्यथां॥१५॥ अथशत्रुदुःखरेखा॥ करशाखासुमध्यस्थेत्र्यंशेयाऊर्ध्वरेखिका॥ तावैरिदुःखसप्राप्तिसूचकावामहस्तगा॥१६॥
अथमित्रप्राप्तिरेखा॥ दक्षिणांगुलिकाअंशेतामित्रावाप्तिकारिका॥ रेखावेधेफलंन्यूनंस्फुटत्वेतिन्नायास्फलं॥१७॥ अथमातापि
तामृत्युज्ञानरेखा॥ तर्जन्याधस्त्रिवेण्यंतर्यदारेखाद्वयंभवेत्॥ आद्यादैर्घ्येपितुर्मृत्युः प्रथमंमातुरन्यथा॥१८॥ अथपूर्वपश्चात्सुखदुःख
रेखा॥ अंतेयदायुरेखायाः रेखांगुष्टधनोन्मुखी॥ तदापूर्वसुखीपश्चाद्दुखीवानिर्धनःपुमान्॥१९॥ मित्रपीडामात्ररेखा आयुरेखाचसंगमे॥ यौ
वनेस्करवभोक्तास्यादंगुष्टावयवेयवे॥२०॥ अन्यच्चपक्षांतरमाह॥ सामुद्रिकसंग्रहे॥ प्रतिरेखाभवेद्यस्यप्रारंभेएकएवसा॥ वक्राच्छिन्नापु
नःसापिपरयावेधितादृढं॥२१॥ नकुत्रापित्रुभाद्दष्टारेखाएवंविधाद्विज॥ लक्षणज्ञावदंत्येवंमिश्रकेव्यधमाधमा॥२२॥ धान्यवर्णाभ
वेदादौअंतेश्यामामशीनिभा॥ आदौदुःखंपुनर्दुःखंमध्येकिंचित्सुखंभवेत्॥२३॥ स्कांदे॥ मानापहारिणीरेखावक्रारुक्षाकृशागुह॥
औदास्यंकुरुतेबाल्येयौवनेभ्रमणंसदा॥२४॥ अथनिरंतरस्करवदुःखरेखा॥ विलासे॥ तर्जनीगृहबंधातर्रेखासात्यात्सुखप्रदा॥ अंगु

ष्टपितृरेखांतस्तिर्यग्रेखाऽपदप्रदा॥२५॥ अथअंगुलीनांसर्वपर्वेषुरेखाफलंसंजीवने॥ ऊर्ध्वरेखाचतस्रपुअंगुलीषुभवंतिचेत्॥ ना
नाभोगस्कखंसेनासमुद्रवचनंयथा॥२६॥ संग्रहे॥ यदिरेखासर्वांगुलीसमस्तापर्वांतरेस्थिताव्यक्ता॥ स्पष्टेयवोऽपिपुंसांमहीय
सांतन्महीशत्वं॥ २७॥ अथविंशोपकाफलं॥ विंशोपकानांविंशात्याधर्मवान्भाग्यवान्धनी॥ मिश्रश्चैकोनविंशत्यातदष्टादश
केधमः॥ २८॥ इतिप्रकीर्णरेखानिर्णयः॥ ॥अथद्वात्रिंशल्लक्षणरेखानिर्णयः॥ ॥अथतन्नामानि॥ हस्तसंजीवने॥ छत्रं १
तामरसं २ धनू ३ रथवरो ४ दंभोलि ५ कूर्मो ६ कुशा ७ वापी ८ स्वस्तिक ९ तोरणानि १० चसरः ११ पंचाननः १२ पादपः १३॥ चक्रं १४
शंख १५ गजौ १६ समुद्र १७ कलशौ १८ प्रासाद १९ मत्सा २० यवाः २१ यूपः २२ सूर्य २३ कमंडलुः २४ न्यवनिभृत् २५ सच्चामरो २६
दर्पणः ॥२७॥ २९॥ उक्षा २८ पताका २९ कमलाभिषेकः ३० सुदाम ३१ केकी ३२ धनपुण्यभाजां ॥ एतानिमुख्यानिनिरूप्यप-
श्चाद्विशेषकंग्रथमताप्रवक्ष्ये॥ ३०॥ एवत्फलमाहहस्तबिंबे॥ मणेस्तलोन्मुखेमत्स्येसहस्त्रधनवान्नरः॥ मकरेदशसाहस्रीशखेल
क्षपतिर्भवेत्॥ ३१॥ ग्रंथांतरे॥ मीनांकःशतभागीसहस्रभागीसदैवमकरांकः॥ शंखाकोलक्षपतिःकोटिपतिर्भवतिपद्मांकः
॥३२॥ पुराणांतरे॥ चक्रेकोटिंविजानीयात्शंखेकोटिसहस्त्रकं॥ मत्स्येशतसहस्राणिह्यनंतंपद्महस्तके॥ ३३॥ मतांतरंपुनः॥ म
त्स्येनवशतंद्रव्यंशंखेचदशलक्षकं॥ मीनादयःकरेस्पष्टाच्छिन्नाभिन्नादयोल्पदाः॥ ३४॥ मीनोमकरःशंखःपद्मोवांतर्मुखःसदाफलदः॥
पाणौबहिर्मुखोयदितत्फलंपश्चिमेवयसि॥ ३५॥ नन्वत्रसर्वापेक्षयामपद्ममेवाधिकंतत्कथमित्यापेक्षायांमार्कंडेयपुराणेमकरादीनां
क्रमेणफलमुक्तंतदेवोच्यते॥ ३६॥ मार्कंडेयउवाच॥ तामसोमकरोनामविधिस्तेनावलोकितः॥ पुरुषोऽथतमःप्रायःस्वशीलोपिहि
जायते॥ ३७॥ बाणःखड्गोधनुःशक्तिःशूलःपाशश्चजायते॥ दशानानाथकुरुतेजातिमैत्रीचराजिनिः॥ ३८॥ ददातिशौर्यवृ
त्तीनांभूभुजायेचतत्प्रियाः॥ क्रयविक्रयशस्त्राणांनान्यत्रप्रीतिरेवच॥ ३९॥ एकस्यैवभवत्येषानरेस्यनसुतानगः॥ द्रव्यार्थमुद्य
तोनाशेसंग्रामेनानुषज्जते॥ ४०॥ इतिमकरः॥ रजस्तमोभयश्चान्यः शंखसंज्ञोह्रियोनिधिः॥ तेनेषमीयतेविप्रतद्गुणत्वंनिधीश्वरः

॥ एकस्यैवभवत्येपनरनान्यमुपैतिच ॥ यस्यत्वांखोनिधिस्तस्यस्वरूपंक्रोष्टुकेश्रृणु ॥ २२॥ एकएवात्मनामृष्टमन्नंभुंक्तेतथापरे
॥ कदन्नभुक्परिजनः स्त्वशोभनंचवस्त्रधृक् ॥ २३॥ नददातिसुकृद्भार्यांनत्पुत्रांश्चस्नुषादिषु ॥ स्वपोषणपरःशंखीनरोभवतिसर्वदा
॥२४॥ इतिशंखः॥ एकंमहापद्मं ॥ पद्मोनामनिधिःपूर्वंसयस्यभवतिद्विज ॥ सतस्यतत्कृतानांचनत्पुत्राणांचनान्यगः ॥२५॥ दक्षिण्य
सारपुरुषोतेनचाधिष्ठितोभवेत् ॥ सत्याधारोमहानागोयतोसौसात्विकोनिधिः ॥२६॥ सुवर्णताम्ररूप्यादिधातूनांचपरिग्रहं ॥ करोत्य
तितरांसोऽपितेषांचक्रयविक्रयौ ॥२७॥ करोतिचसदायज्ञंदक्षिणाश्चप्रयच्छति ॥ सत्यसंसक्तचेताश्चसकारयतितन्मनः ॥ ३४८ ॥ स
त्वाधारोनिधिश्चान्योमहापद्मइतिस्मृतः ॥ सत्वप्रधानोभवतितेनश्चाधिष्ठितोनरः ॥४९॥ करोतिपद्मरागादिरत्नानांचपरिग्रहं ॥ समौक्ति
कप्रवालानांतेषांचक्रयविक्रयौ ॥५०॥ ददातियोगशीलेभ्यस्तेषामावसतांस्तथा ॥ सकारपतितत्सीलः स्वयमेवचजायते ॥५१॥ तत्सु
ताश्चतथाशीलाः पुत्रपौत्रक्रमेणच ॥ पूर्वार्द्धमात्रःससांशोःपुरुषांश्चनमुंचति ॥५२॥ इतिपद्मः॥ चिन्हासे ॥ एकोप्यभिमुखस्तस्य
मत्स्यः श्रीवृद्धिकारणं ॥ संपूर्णः किंपुनस्तौद्वौपाणिमूलस्थितौ नृणां ॥५३॥ यस्यमीनसमारेखाकामसिद्धिःप्रजायते ॥ धनाढ्यःसतु
विज्ञेयोबहुपुत्रोनसंशयः ॥५४॥ आतपत्रंकरेयस्यदंडेनसहितंपुनः ॥ ध्वजंवाचामरयुगंचक्रवर्तीसजायते ॥५५॥ ध्वजोहस्ततले
यस्यसवृद्धत्वेस्करवीभवेत् ॥ करभोमांसलःश्रेष्ठोंगुलीपर्वनमांसलं ॥५६॥ करभान्निर्गतारेखाधनरेखांयदागता ॥ अंकुशाकारभृ
द्यस्यसपुमान्गजवान्नृपः ॥५७॥ हस्तिरेखाधरोराजाश्वरःसिंहाकृतौकरौ ॥ वृषभेगोकुलपतिः कर्षकोबहुरूपवान् ॥५८॥ ध्वजव
ज्रांकुशंछत्रंशंखपद्मादयस्तले ॥ यस्यपादेचदृश्येतेसभवेच्छ्रीपतिःपुमान् ॥५९॥ अंकुशंकुंडलंछत्रंयस्यपाणितलेभवेत् ॥ त
स्यराज्यंविनिर्दिष्टंसमुद्रवचनंयथा ॥६०॥ अंकुशेनिप्रतिष्ठावान्प्रासादेऽश्वेसुखीधनी ॥ मत्स्येतुपश्चिमवयःसुखीयोयांत्रिकःपुमा
न् ॥६१॥ सूर्येप्रतापवान्चंद्रश्चंद्रेप्रकृतिकोमलः ॥ सिंहासनेपट्टधारीमयूरेमानुल्लात्स्करवी ॥६२॥ पुनःशिवः ॥ स्वस्तिकेजनसौभाग्यंमी
नःसर्वत्रपूज्यते ॥ श्रीवत्सेवांछितालक्ष्मीर्गवाढ्येदामकेनतु ॥ ६३॥ शक्तितोमरदंडाश्चधनुश्चक्रगदोपमाः ॥ यस्यहस्तेभवेद्रेखाराजानं

तंविनिर्दिशेत्॥ ६४॥ तुलाग्राममथोवज्रंकरमध्येतुदृश्यते॥ वाणिज्यंसिध्यतेतस्यपुरुषस्यनसंशयः॥ ६५॥ त्रिकोणेरेखयासारमुशलो
लूखलादिना॥ अशकभंहस्तजातेनपुरुषःस्यात्कृषीवलः॥ ६६॥ संजीवने॥ नंदावर्तेनृपपदंसौभाग्यंकक्षयाकृतौ॥ पूर्णकुंभधरःपाणौनरः
पूर्णमनोरथः॥ ६७॥ रथाकारेरथिलोकेसोद्यमःपरिवारवान्॥ खड्गादिशस्त्राकारेस्यात्क्लेशकारीस्फसाहसः॥ ६८॥ धनुषावहुभोलोकेमं
त्रीचामरवान्करे॥ पुष्पमालांकितोहस्तेयशस्वीधनवान्नरः॥ ६९॥ मुकुटेराजमान्यःस्यात्कमलेबहुभोगवान्॥ मुष्टौतिलेपुत्रपूर्णःसर्प
क्रोधीमहाधनी॥ ७०॥ छत्रेहवीप्रतिष्ठावान्स्वस्तिकेवार्द्धकेस्करवी॥ स्थलपद्मेऽतिचतुरोक्षमावान्मर्दलाकृतौ॥ ७१॥ षट्कोणेधर्मवा
न्धीरःतेजस्वीमणिरेखया॥ सरोवरेनिवानागःकुलमुख्योयुगाकृतौ॥ ७२॥ कुंतेक्लेशीसिद्धकार्योविद्यावान्स्याच्छराकृतौ॥ विमानेदुर्ग
गेहादिनिर्माताकीर्तिमान्जनः॥ ७३॥ मायास्कदशाभिश्चक्रेराजायोगीश्वरोऽथवा॥ दशभिःशंकिभिःसर्वावस्थास्फबहुदुःखिताः॥ ७४॥ वृ
क्षोवानोरणंशक्तिर्मठंदेवकुलानिच॥ अपुत्रंतंविजानीयान्धनवतंमहाधिपं॥ ७५॥ विवेकविलासे॥ सिंहासनदिनेशाभ्यांनंदावर्तेदुवार
णैः॥ पाणिरेखास्थितैर्मर्त्याःसार्वभौमानसंशयः॥ ७६॥ तथादेवकुलाकाररेखाभिर्धार्मिकःपुमान्॥ पुस्तकेशास्त्ररासिकोधर्मीदेवकुलेभवे
त्॥ ७७॥ याव्ययानरथाश्वेभवृषरेखांकिताःकराः॥ येषांतेपरसैन्यानांहठग्रहणकर्मठाः॥ ७८॥ एकमप्याकर्धपाणौषट्त्रिंशन्मध्यतोय
दि॥ तदापरैरयोध्यःस्याद्वीरोभूमिपतिर्जयी॥ ७९॥ उडयोमंगिणीपोतोयस्यपूर्णःकरांतरे॥ सरूप्यस्वर्णरत्नानांपात्रंसायांत्रिकःपुमान्॥
८०॥ गोमंतःस्युर्नरासोधैर्धामभिःपाणिसंस्थितैः॥ कमंडलुध्वजौकुंभस्वस्तिकौश्रीप्रदौनृणां॥ ८१॥ वाप्यांसर्वजनादेयःसमुद्रेस्यान्महा
नृपः॥ दर्पणेज्ञानसंपूर्णोभिषेकेचाभिषेकवान्॥ ८२॥ चक्राकारोध्वजाकारःखड्गाकारश्चदृश्यते॥ सर्वविद्याप्रधानोयंबुद्धिमान्नृपपूजि
तः॥ ८३॥ शूलंपाणौयस्यपुंसःसतुधर्मरतोभवेत्॥ यज्ञधर्मादानरक्तोदेवगुर्वोस्तुपूजकः॥ ८४॥ वराहः॥ वज्राकाराधनिनांविद्याभा
जांतुमीनपुच्छनिभाः॥ शंखातपत्रशिबिकागजाश्वापद्मोपमान्नृपते॥ ८५॥ कलशमृणालपताकांकुशोपमाभिर्भवंतिनिधिपालाः॥
दामनिभाभिश्चाढ्याःस्वस्तिकरूपाभिरैश्वर्यं॥ ८६॥ चक्रासिपरशुतोमरशक्तिधनुःकुंतसन्निभारेखाः॥ कुर्वंतिचमूनाथयज्वानमुलू

रवन्ताकाराः॥८७॥ मकरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः॥ वेदीनिभेनचैवाग्निहोत्रिणोब्रम्हतीर्थेन॥८८॥ वापिदेवकुला
द्यैर्द्धं कुर्वेनिचत्रिकोणाभिः॥ मीनाय्कांकितपाणिर्नित्यंसत्रप्रदोभवति॥८९॥ सामुद्रिकसंग्रहे॥ शैलःप्रांशुतनुबाहस्ततलेयस्य
विस्फुटोस्फुरति॥ सपुमान्प्राज्यंराज्यंलभतेनिजभुजसहायोऽपि॥९०॥ कूपेधर्मपरोज्ञेयः शरचिन्हेकृषीकरः॥ अश्वेवाशत्रुसेनायांसर्वत्र
विजयीभवेत्॥९१॥ विप्रस्ययस्यथूपांवेदनिभंब्रम्हतीर्थमपिहस्ते॥ विश्वाधिपतिर्नियतंसभवेदथवाऽग्निहोत्रीशः॥९२॥ चक्रंडमरुकंचै
वयस्यहस्तेविराजते॥ चत्वारिंशात्परंसौख्यंमखंडंतस्यनिर्दिशेत्॥९३॥ यवेविंशतिमेवर्षेपद्मेषोडशकेपुमान्॥ छत्रचामरयुक्तश्चत्रिंशद्वर्षे
युतोनरः॥९४॥ नंद्यामेकादशेवर्षेसमुद्रेजन्मतोनरः॥९४॥ सुखासनेसप्तवर्षेसप्तवर्षैस्तुकुंडलौ॥९५॥ षोडशोमत्सलांगूलेकोष्टेविंशेविनि
र्दिशेत्॥ सर्पेश्चवृश्चिकेगौरेविषैश्चवर्षपंचमे॥९६॥ यस्यपाणितलेरेखाप्राकारस्तोरणाकृतिः॥ अपिदासकुलेजातः सोपिराजाभविष्य
ति॥९७॥ सरोजश्रीवृक्षध्वजगजतिमिस्तंभकलशास्त्रगादर्शाच्छत्रांकुशाकुलिशभृंगारगिरिभिः॥ रथाश्वश्रीवत्सव्यजनयवयूपप्रभृतिभि
र्नरानार्योराज्यंदधतिपदपाणिप्रभृतिभिः॥९८॥ मतातरं॥ शंखचक्रमकरांबुजमीनाः सार्वभौमपददामतुलानां॥चापदंडमुशलांकुशरे
खाकीर्तिवृत्तगददाखलुनृणां॥९९॥ खनित्रंपीठकंशूलंयस्यहस्तेविराजते॥ विप्रोऽपिशूद्रवृत्तिर्वाप्राप्नोत्येवनसंशयः॥४००॥ पाणि
पादतलेचक्रंकस्यचिकेनहिदृश्यते॥ मृगसर्पज्वरंघोरंतद्भवेद्धस्तमध्यगे॥१॥ ततद्दंडंविजानीयाद्दंडरेखाप्रकीर्तिता॥ चेद्यस्यपाणौचरणेच
चक्रंधनुर्ध्वजाब्जव्यजनासनानि॥ रथश्चदोलाकमलाविलासास्तस्यालयेस्युर्गजवाजिशालाः॥२॥ यस्यपाणौचपादेचवीणावाद्यमृ
दंगकं॥ सभवेत्पृथिवीपालोऽथवापंडितशौंडिकः॥३॥ शंखचक्रतोरणानांयस्यहस्ततलेभवेत्॥ वित्तहीनोऽपिविज्ञेयः शत्रुभिश्चनभि
द्यते॥४॥ सूर्यश्चंद्रोऽथवायस्यद्विजस्यतुविशेषतः॥यज्ञयाजीभवेन्नित्यंबहुवित्तस्यमानवः॥५॥ सामुद्रिकसंग्रहे॥ पद्ममष्टदलाकारंत्वच्छि
न्नंपाणिपल्लवे॥ अपिहीनकुलेजातःक्षितिपालोभवेन्नरः॥६॥ अभ्यंतरमुखंमत्स्यंयस्यपाणितलेभवेत्॥ तस्यराज्यंविनिर्दिष्टंसमुद्रवचनंय
था॥७॥ मतान्तरं॥ कूपेतुयज्ञभागीस्यात्शक्तिस्तुविजयावहा॥ अंकुशोराज्यमेकंचकुलिशेचैवतस्करः॥८॥ यस्याहर्निशशक्रस्याद्रेखासु

शरलरूपिणी ॥ नरःपापंप्रकुरुते प्रसूलेकुशालीसुतं ॥९॥ अथवासभवेच्चौरः प्रोक्तोवागुरुघातकः ॥ चतुःकोणंत्वग्निकुंडंयोगयज्ञफ
लंलभेत् ॥१०॥ तथाचोक्तं ॥ सर्वसिद्धिकरंकुंडंचतुरस्रमुदाहृतं ॥ पुत्रप्रदंयोनिकुंडमर्द्धेंद्वाभंस्फरवप्रदं ॥११॥ शत्रुक्षयकरंत्र्यस्रंवर्तुलंशांति
कर्मणि ॥ छेदमारणयोःकुंडेषडस्रंपद्ममेवच ॥१२॥ वृष्टिदंरागशमनंकुंडमष्टास्त्रिमीरितं ॥ पुष्पचिन्हंकूर्मचिन्हंसभवेत्पृथिवीपतिः ॥१३॥
अथवेदरेखा ॥ मूलेंगुष्टस्यवेदानांचतुरस्रयएवच ॥ एकेद्वेवायथायोगरेखाज्ञेयाद्विजन्मनां ॥१४॥ अथपूर्वोक्तांकुशादिचिन्होपरिद्रव्य
संख्या ॥ अंकुशेतुसहस्रंचतटाकेचशतंध्रुवं ॥ नद्यांपंचसहस्रंचसमुद्रेकोटिभिर्नरः ॥१५॥ छत्रेछत्रपतिर्लक्षंचामरेचसहस्रकं ॥ सुरवा
सनेद्विलक्षंचगजेसिंहेत्रिकोटयः ॥१६॥ रथेपंचशतंचक्रेलांगुलेशतमर्द्धकं ॥ कोष्टकुंडलसाहस्रौवृषेशतयुतोनरः ॥१७॥ सर्पेचसर्पविभवो
गर्धभेगर्धभस्तथा ॥ मार्जारेचतथाश्वानेमर्कटेसर्वभिक्षते ॥१८॥ शोकवियोगेधनुषेकूपेचैवकुलक्षयः ॥ कृकलासःकपोतश्चपल्लीभिपात
कीनरः ॥१९॥ अथनंदनाममहानिधिलक्षणंफलंच ॥ स्तंभश्चकुंभोस्फर्तरुस्तुरंगोगदामृदंगोंघ्रिकरप्रदेशे ॥२०॥ रजःसत्वमयश्चान्योनंदो
नाममहानिधिः ॥ उपैतिस्तंभमधिकंनरस्तेनावलोकितः ॥२१॥ समस्तधातुरत्नानांपण्यबाधादिकस्यच ॥ परिग्रहंकरोत्येषस्तथैवक्रयवि
क्रयो ॥२२॥ आधारःस्वजनानांचतथैवाभ्यागतस्यच ॥ सहतेनावमानोक्तिस्वल्पामपिमहामते ॥२३॥ स्तूयमानस्यमहतींप्रीतिंबध्नाति
यच्छति ॥ यंयंमिच्छतिवैकामंमृदुत्वमुपयातिच ॥२४॥ बह्वोभार्याभवंत्यस्यसूतिमध्येतुशोभनं ॥ रमयेत्ससत्वनरानिधिर्नंदोऽनुवर्तते ॥२५॥
प्रवर्द्धमानंतुनरःमष्टभागेनसत्तम ॥ दीर्घायुषश्चसर्वेषांपुरुषाणांप्रयच्छति ॥२६॥ बंधूनामेवभरणंयेचदूरादुपागताः ॥ तेषांकरोतिनंदःस
परलोकेनचाद्दतः ॥२७॥ पूर्वमित्रैश्चशैथिल्यंप्रीतिमन्यैःप्रजायते ॥ अथमुकुंदनिधिलक्षणंफलंच ॥ वीणाचपाणौचरणेनराणांलेख्यु
र्नराणामधिपावरेण्यः ॥२८॥ रजोगुणमयश्चान्योमुकुंदोनामयोनिधिः ॥ नरोविलोकितस्तेनतद्गुणोभवतिद्विज ॥२९॥ वीणावेणुमृदंग
धैरातोद्यस्यपरिग्रहं ॥ करोतिगायतांचित्तंनृत्यंत्यांचप्रयच्छति ॥३०॥ बंदिनामथसूतानांविषताळास्यपाठिनां ॥ ददात्यहर्निशंभोगान्
भुंक्तेतैस्तैसमंद्विज ॥३१॥ कुलटास्फरतिश्चास्यभवंत्यन्यैश्चतद्विधैः ॥ प्रयातिसंगमेकंचसमिधिर्भजतेनरं ॥३२॥ अथकच्छपनिधिः

णीः॥१॥ द्वात्रिंशल्लक्षणंपुंसः पूर्वमेवमयोदितं॥ प्रत्यंगानांविशेषेणफलमत्रनिरूप्यते॥२॥ वराहः॥उन्मानमानगतिसंहतिसा
रवर्णस्नेहस्वरप्रकृतिसत्वमथोह्यनूकं॥ क्षेत्रंमृजांचविधिवत्कुशलोवलोक्यसामुद्रविद्वदतियातमनागतंच॥३॥ अथपादपा
र्ष्णिगुल्फादिलक्षणं॥ सएव॥ अस्वेदनौमृदुतलौकमलोदराभौश्लिष्टांगुलीरुचिरताम्रनखौसुपार्ष्णी॥उष्णौशिराविरहि-
तौचनिगूढगुल्फौकूर्मोन्नतौचचरणौमनुजेश्वरस्य॥४॥ सूर्पाकारविरूक्षपांडुरनखौवक्रौशिरासंततौसंशुष्कौविरलांगुली
चचरणौदारिद्र्यदुःखप्रदौ॥मार्गायोत्कटकौकषायसदृशौवंशस्यविच्छिन्नदौब्रम्हघ्नौपरिपक्वमृत्द्युतितलौपीतावगम्यार-
तौ॥५॥ अथजंघालक्षणं॥शिवः॥हस्तिहस्तकजंघाश्चभवेयुर्धनिनोनराः॥ अश्वजंघाचराजानोदीर्घायुर्मृगजंघकाः॥६॥
स्थूलाभिर्मृगजंघाभिर्जायतेध्वानगामिनः॥सिंहव्याघ्रमीनजंघाधनकीर्तिप्रदायिका॥७॥ श्वसृगालसमाजंघारोमयुक्तादरि
द्रिणी॥स्थूलजंघाश्चसूक्ष्माश्चश्रियंभुंजंतिमानवाः॥८॥उष्ट्रजंघानरायेचनित्यभाग्यविवर्जिताः॥काकजंघानरायेचतेषांरा
ज्यंविनिर्दिशेत्॥९॥ अथरोमकूपफलं॥एकरोमाभवेद्राजाद्विरोमाधनवान्भवेत्॥ त्रिरोमः पंडितः प्रोक्तोबहुरोमादरिद्रता॥१०॥
वराहः॥रोमैकैकेकूपिकेपार्थिवानांद्वेद्वेरोम्णीपंडितश्रोत्रियाणां॥ त्र्याद्यैर्निःस्वामानवादुःखभाजः केशाश्चैवंनिंदिताःपूजिताश्च
॥११॥ अथजानु॥ निर्मांसजानुर्म्रियतेप्रवासेसौभाग्यमल्पैर्विकटैर्दरिद्रः॥स्त्रीनिर्जिताश्चापिभवंतिनिम्नैराज्यंसमांसैश्चमहद्भिरा
युः॥१२॥ अथलिंगं॥ लिंगेल्पेधनवान्यपत्यरहितः स्थूलेविहीनोधनैःमेंढ्रेवामनतेसुतार्थरहितः वक्रेऽन्यथापुत्रवान्॥ दारिद्र्यंवि
नतेत्वधोऽल्पतनयोलिंगेशिरासंततेस्थूलग्रंथियुतेसुखीमृदुकरोऽत्यंतंप्रमेहादिभिः॥१३॥ कोशनिगूढैर्भूपादीर्घैर्भग्नैश्चवित्तपरि-
हीनाः॥ ऋजुवृत्तशेफसोलघुशिरालशिश्नाश्चधनवंतः॥१४॥ शिवः॥ दक्षिणावर्तलिंगेनपुत्रवान्अन्यथावधू॥ स्थूलंवृणंभवे
ल्लिंगंसनरोदुःखवान्भवेत्॥१५॥दीर्घलिंगेनदारिद्रंह्रस्वलिंगेनभूपतिः॥कृशलिंगेनसौभाग्यंस्थूललिंगेनदुःखितः॥१६॥ धारै
कामूत्रयत्यस्मिन्दक्षिणावर्तिनीयदि॥ मधुगंधेनशुक्रेणनरःस्त्रीजनवान्नृपः॥१७॥ अथवृषणाः॥ वराहः॥जलमृत्युरेकवृषणो

विषमैः स्त्रीचंचलः समैः क्षितिपः ॥ ह्रस्वायुश्चोद्बद्धैः प्रलंबवृषणस्यशतमायुः ॥ १८ ॥ रक्तैराद्यामणिभिर्निर्द्रव्याः पांडुरैश्चमलिनैश्च ॥ सु
खिनः सशब्दमूत्रानिस्वाः निः शब्दधाराश्च ॥ १९ ॥ द्वित्रिचतुर्धाराभिः प्रदक्षिणावर्तेवलितमूत्राभिः ॥ पृथिवीपतयोज्ञेयाविकीर्णमूत्रा
श्चधनविहीनाः ॥ २० ॥ एकैकमूत्रधाराबलितारूपप्रदानसुतदात्री ॥ स्निग्धोन्नतसममलयो धनवतिनारत्नभोक्तारः ॥ २१ ॥ अथमणयः ॥
मणिभिश्चमध्यनिम्नैः कन्यापितरोभवंतिनिःस्वाश्च ॥ बहुपशुभाजोमध्योन्नतैश्चनान्युज्वर्णैर्धनिनः ॥ २२ ॥ परिशुष्कबस्तितीर्षैर्द्धनरहि-
तादुर्भगाश्चविज्ञेयाः ॥ अथशुक्रफलं ॥ कुसुमसमश्चशुक्रगंधोविज्ञातव्योमहीपालः ॥ २३ ॥ मधुगंधोबहुवित्तो मत्स्यसगंधेबहून्यपत्या
नि ॥ तनुशुक्रः स्त्रीजनकोमांससगंधोमहाभोगी ॥ २४ ॥ मदिरागंधयोगेनयज्वाक्षारात्दरिद्रकः ॥ शिवः ॥ लाक्षागंधोबवेन्निस्वःमांसगं
धेनतस्करः ॥ २५ ॥ व्यसनंचवसागंधात्मद्यगंधेनदुःखितः ॥ कटुगंधेनशुक्रेणपुरुषोदुर्भगोभवेत् ॥ २६ ॥ पयोवर्णेनशुक्रेणभवेद्राजानसं
शयः ॥ श्यामवर्णेनशुक्रेणदेहभोगीभवेन्नरः ॥ २७ ॥ संतानजनकोज्ञेयोअप्स्कवीर्यनिमर्जनात् ॥ तरणेवीर्ययुक्तोऽपितंनरंषंडमादिशेत्
॥ २८ ॥ अथमैथुनल० ॥ वराहः ॥ शीघ्रंमैथुनगामीदैर्घायुरतोऽन्यथाऽल्पायुः ॥ २९ ॥ अथमेहनल० ॥ शिवः ॥ समपादोपविष्टस्यमही
स्पृशतिमेहनं ॥ सभवेद्दुःखितोनित्यंदारिद्र्येणचपीडितः ॥ ३० ॥ समपादोपविष्टस्यगुल्फौस्पृशतिमेहनं ॥ ईश्वरंतंविजानीयात्सुखिनं
भोगिनंनरं ॥ ३० ॥ सिंहव्याघ्रसमंयस्यहस्तिवद्वाथमेहनं ॥ भोगवान्सतुविज्ञेयः तथातुरंगमेहने ॥ ३१ ॥ अथस्फीकल० ॥ वराहः
निःस्वोऽतिस्थूलास्फिक्समांसलःस्फिक्सुखान्वितोभवति ॥ स्याघ्रांतोध्यर्द्धस्फिक्मंडूकस्फिकनराधिपोभवति ॥ ३२ ॥ अथकटि
ल० ॥ सिंहकटिर्मनुजेंद्रः कपिकरभकटिर्धनैःपरित्यक्तः ॥ शिवः ॥ शुभाव्याघ्रकटीऋक्षवानराभानशोभना ॥ ३३ ॥ बिस्तीर्णा
चकटिस्निग्धाशुभापुंसांप्रशस्यते ॥ निर्मांसातुकटिर्बस्तितेनरादुःखभागिनः ॥ ३४ ॥ अथउदरलक्ष० ॥ मंडूकसदृशोयस्योदरःस
स्यात्तुभूपतिः ॥ व्याघ्रोदरोगजाधीशोऽसृगालोदरकोऽधमः ॥ ३५ ॥ सिंहोदरोनरोयस्तुधनधान्यसमृद्धिमान् ॥ वराहः ॥ समजठराभो
गयुताघटपिठनिभोदरानिःस्वाः ॥ ३६ ॥ अथपार्ष्णीकुक्षील० ॥ अविकलपार्ष्णीधनिनोनिम्नैर्वक्रैश्चभोगसंत्यक्ताः ॥ समकुक्षि

भोंगाथोनिम्नाभिर्भोगपरिहीनाः ॥ ३७ ॥ उन्नतकुक्षाः क्षितिपाः कुटिलाः स्युर्मानवा विषमकुक्षाः ॥ सर्पोदरा दरिद्राभवंतिबह्वाशिनश्चैव ॥ ३८ ॥
अथनाभिल० ॥ परिमंडलोन्नताभिर्विस्तीर्णाभिश्चनाभिभिः सुखिनः ॥ स्वल्पात्वदृश्यनिम्नानाभिः क्लेशावहाभवति ॥ ३९ ॥ वलिमध्य
गताविषमा शूलाबाधांकरोतिनैस्वंच ॥ साडयंवामावर्ताकरोतिमेधांप्रदक्षिणतः ॥ ४० ॥ पार्श्वायुताचिरायुषमुपरिष्टाच्चैश्वर्यंगवाद्य
मधः ॥ शतपत्रकर्णिकाभानाभिर्मनुजेश्वरंकुरुते ॥ ४१ ॥ शिवः ॥ वर्तुलाचातिगंभीरानाभिः पुंसांप्रदृश्यते ॥ उत्तानविरलानाभिः
सदादुःखप्रदायिनी ॥ ४२ ॥ अथवलयः ॥ वराहः ॥ शस्त्रांतंस्त्रीभोगिनमाचार्यंबहुसुखंयथासंख्यं ॥ एकद्वित्रिबहुभिर्वलिभि
र्विद्यान्नृपंत्ववलिः ॥ ४३ ॥ विषमवलयोमनुष्याभवंत्यगम्याभिगामिनः पापाः ॥ ऋतुवलयः सुखभाजः परदारद्वेषिणश्चैव ॥ ४४ ॥ अ
थपार्श्वे ॥ मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः ॥ विपरीतैर्निर्द्रव्याः सुखपरिहीनाः परप्रेष्याः ॥ ४५ ॥ अथचुचुकल०
॥ सुभगाभवंत्यनुद्धतचुचुकानिर्द्धनाविषमदीर्घैः ॥ पीनोपचितनिमग्नैः क्षितिपतयश्चुचुकैः सुखिनः ॥ ४६ ॥ अथहृदयं ॥ हृदयंस
मुन्नतंपृथुलवेपनंमांसलंचनृपतीनां ॥ अधुनानांविपरीतंखररोमवितशिरालंच ॥ ४७ ॥ विस्तीर्णहृदयंयेषांमांसलोपचितंसमं ॥ शता
युस्तंविजानीयाद्बहुभोगंमहाधनं ॥ ४८ ॥ अथवक्षसं ॥ समवक्षसोऽर्थवंतः पीनैः शूरास्त्वकिंचनास्तनुभिः ॥ विषमंवक्षोयेषांतेनिःस्वा
शस्त्रनिधनाश्च ॥ ४९ ॥ अथजत्रुः ॥ विषमैर्विषमोजत्रुभिरर्थविहीनोऽस्थिसंधिपरिणद्धैः ॥ उन्नतजत्रुर्भोगीनिम्नैर्निःस्वोऽर्थवानपीनैः
॥ ५० ॥ अथनरस्तनल० ॥ शिवः ॥ उन्नतोपचितौयेषांस्तनौस्निग्धौपयोधरौ ॥ सनरोमैथुनेशूरोभगवंतःस्वकर्मभिः ॥ ५१ ॥ उन्नतौ
नैवतस्निग्धौ शिथिलौ अपयोधरौ ॥ निर्मांसौचकुरूपौचतेनरादुःखभोगिनः ॥ ५२ ॥ अथग्रीवाकंठल० ॥ वराहः ॥ चीपटग्रीवोनिः
स्वः शुष्काससिराचमस्थवाग्रीवा ॥ महिषग्रीवःशूरः शस्त्रांतोमृगसमग्रीवः ॥ ५३ ॥ कंबुग्रीवोराजासलंबकंठः प्रभक्षणोभवति ॥ शि
वः ॥ ग्रीवातिवर्तुलापूर्णकुंभाभासनृपोधनी ॥ ५४ ॥ शुकोष्ट्रकाकशिखिनांग्रीवाभानातिशोभना ॥ अथपृष्टल० ॥ सिंहपृष्ठोनरोप
स्तुधनंतस्यविनिर्दिशेत् ॥ ५५ ॥ कूर्मपृष्टोभवेद्राजाधनसौभाग्यवान्पुनः ॥ वराहः ॥ पृष्टमभग्नमरोमशमर्थवतामशुभदमतोऽन्यत् ॥ ५६ ॥

अथकक्षाल० ॥ अस्वेदनपीनोन्नतसुगंधिसमरोमसंकुलाकक्षा ॥ विज्ञातव्या धनिनां ततोऽन्यथा ऽर्थैर्विहीनानां ॥५७॥ अथ अंसौस्कंधौ ॥ निर्मांसौ रोमन्चितौ भग्नावल्पौ च निर्द्धनस्यांसौ ॥ विपुलावव्युच्छिन्नौ सुश्लिष्टौ शौर्यवित्तवतां ॥५८॥ शिवः ॥ वृषस्कंधा गजस्कंधा कदलीस्तंभमेवच ॥ महात्मानो महाधन्यास्ते सर्वे पार्थिवोपमाः ॥५९॥ अथबाहू वराहः ॥ करिकरसदृशौ वृत्ता वा आनुविलंबिनौ समौ पीनौ ॥ बाहू पृथिवीशानां अधनानां रोमशौ ह्रस्वौ ॥६०॥ अथचुबुकल० ॥ अतिकृशादीर्घैश्चुबुकैर्निर्द्रव्या मांसलैर्द्धनोपेता ॥ बिंबोपमैरवक्रैरधरैर्भूपास्तनुभिरस्वाः ॥६१॥ औष्टैः स्फुटितविखंडितविवर्णरूक्षैश्च धनपरित्यक्ताः ॥ शिवः ॥ रक्तोऽधरो भवेद्राजा वक्रोष्टः सर्वदुःखितः ॥६२॥ स्थूलाभ्यां मंथराभ्यां च नरा चात्यंतदुःखिताः ॥ अथदंताः ॥ स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः ॥ ६३ ॥ शिवः ॥ कुंदमुखप्रतीकाशैर्दंतैर्भूपतयः स्मृताः ॥ ऋक्षवानरदंताश्च नित्यं वै क्षुत्तृषार्दिताः ॥ ६४ ॥ सस्नेहैरुज्वलैर्दंतैर्दाडिमीबीजसन्निभैः ॥ सुखिनः सरला ज्ञेया स्त्रीणां च वशाकारकः ॥६५॥ दुःखितो विकृतैर्रूक्षैर्दंतैर्मूषकसंभैः ॥ सभाग्यो मीलितैर्दंतैर्विद्यावान् दंतुरैः पुनः ॥६६॥ द्वात्रिंशद्दशनो राजा भोगी स्यादेकत्रिंशकः ॥ त्रिंशद्दंतास्तु सुखिनः एवं हीनास्तु दुःखिताः ॥ ६७॥ ग्रंथांतरे ॥ क्वचिद्दंतालको मूर्खः क्वचिन्नारी पतिव्रता ॥ क्वचिच्च काणकः साधुः खल्वाटो निर्द्धनः क्वचित् ॥६८॥ अथ जिव्हाल० ॥ शिवः ॥ कृष्णा जिव्हा भवेद्दासः श्यामलायां तु पापकृत् ॥ स्थूला क्रूराऽनृतो मर्त्यः श्वेता आचारवर्जितः ॥६९॥ जिव्हा रक्ता तथा दीर्घा श्लक्ष्णा च सुसमा यदि ॥ मिष्टान्नभोजी स नरो विद्यालक्ष्मीमवाप्नुयात् ॥७०॥ अथतालुल० ॥ कुलनाशो कृष्णतालुवै पद्मपत्रनिभे नृपः ॥ श्वेतं रक्तं शुभं प्रोक्तं समुद्रवचनं यथा ॥ ७१ ॥ अथ मुखं ॥ चंद्रबिंबोपमं वक्त्रं धर्मशीलः सदा भवेत् ॥ मृगमूषकवक्त्रं च धनहीनः प्रकीर्तितः ॥७२॥ वराहः ॥ वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समं च भूपानां ॥ विपरीतं क्लेशभुजां महामुखं दुर्भगानां च ॥ ७३॥ स्त्रीमुखमनपत्यानां शाठ्यवतां मंडलं परिज्ञेयं ॥ दीर्घं निर्द्रव्यानां भीरुमुखाः पापकर्माणः ॥७४॥ चतुरस्रं धूर्तानां निम्नं वक्त्रं च तनयरहितानां ॥ कृपणानामतिह्रस्वं संपूर्णं

भोगिनां कांतं ॥७६॥ अथ कपोलगल्लुगंड ल० ॥ भोगी त्वनिम्नगंडो मंत्री संपूर्णमासगंडो यः॥ शिवः ॥ यस्य गल्लौ हि संपूर्णौ पद्मपत्रसमप्रभौ ॥ सिंहव्याघ्रगजेंद्राणां कपोलौ सदृशौ यदि॥ कृषिभोगी भवेन्नित्यं बहुपुत्रश्च जायते॥ ७७॥ अथ स्मश्रु ल० ॥ वराहः ॥ अस्फुटिताग्रं स्निग्धं श्मश्रु शुभं मृदु च सन्नतं चैव॥ रक्तैः परुषैश्चौराः श्मश्रुभिरल्पैश्च विज्ञेयाः ॥७८॥ अथ क्षुतं ॥ धनिनां क्षुतं सकृद्द्वित्रिपिंडितं ह्लादि सानुनादं च॥ दीर्घायुषां प्रमुक्तं विज्ञेयं संहतं चैव॥ ७९॥ अथ स्वरल० ॥ शिवः ॥ हंसस्वरो नरो धन्यो मेघवत्स्वरतो नृपः॥ मृगोपम स्वरा ये च भोगवंतो नरेश्वराः॥८०॥ क्रौंचस्वरा नरा ये तु भाग्यवंतो भवंति ते ॥ स्वरस्वना नरा ये च निर्द्धना पापकारिणः ॥८१॥ वराहः॥ करिवृषभरथौघभेरिमृदंगसिंहाध्वनिः स्वना भूपाः॥ गर्दभजर्जर रूक्षस्वराश्च धनसौख्यसंत्यक्ताः॥८२॥ अथकर्णौ ॥ निर्मांसैः कर्णैः पापमृत्यवश्चर्पटैः सुबहुभोगाः॥ कृपणाश्च ह्रस्वकर्णैः शंकुश्रवणाश्च भूपतयः॥८३॥ रोमशकर्णा दीर्घायुषस्तु धनभोगिनो विपुलकर्णाः॥ क्रूराशिरावनद्धैर्व्यालंबैर्मांसलैः सुखिनः ॥८४॥ शिवः॥ ह्रस्वकर्णो महाभोगी दीर्घकर्णश्च मध्यमः॥ अथ नासिका ॥ वराहः॥ सुखभाग् शुकसमनासश्चिरंजीवि शुष्कनासश्च॥८५॥ छिन्नानुरूपया ऽगम्यगामिनो दीर्घया तु सौभाग्यं॥ आकुंचितया चौरः स्त्रीमृत्युः स्याच्चिपिटनासः॥८६ ॥ शिवः॥ ह्रस्वनासा नरा ये तु धर्मशीलाश्च ते विदुः॥ हस्तिनासासमा ये च पीतनासाश्च ये नराः ॥८७॥ सर्वे ते सुखिनो मर्त्या तथा च जनवल्लभाः॥ स्थूलनासा वक्रनासा धनशीलविवर्जिताः॥ ८८॥ अथ नेत्रल० ॥ वराहः॥ पद्मदलाभैर्द्धनिनो रक्तांतविलोचनाः श्रियो भाजः॥ मधुपिंगलैर्महार्था मार्जारविलोचनाः पापाः॥८९॥ हरिणाक्षा मंडललोचनाश्च जिम्हैश्च लोचनैश्चोराः॥ क्रूराः केकरनेत्राः गजसदृशलोचनाश्च भूपतयः॥९०॥ ऐश्वर्यं गंभीरैर्नीलोत्पलकांतिभिश्च विद्वांसः॥ अतिकृष्णतारकाणामक्ष्णमुत्पाटनं भवति॥९१॥ मंत्रित्वं स्थूलदृशां श्यामाक्षाणां च भवति सौभाग्यं॥ दीनाक्ष निःस्वानां स्निग्धा विपुलार्थभोगवतां ॥९२॥ शिवः ॥ कुक्कुटाक्षाः सदा दक्षाः मृगाक्षा शुभलक्षणाः॥ बिडालहंसनेत्रा ये भवंति पुरुषाधमाः॥९३॥

गवाक्षाः शुभगानित्यंव्याघ्राक्षाश्चांतकोपमाः ॥ अथभ्रुवो ॥ विशेषःपुनरेकोत्रभ्रुवोर्मध्येयदीक्षते ॥ कूर्पाक्षिरोमविन्यासोराज्यं
तेनविनिर्दिशेत् ॥ मयूरनकुलाक्षाश्चतेनरामध्यमास्मृताः ॥ श्वानाक्षतुल्याक्षाः क्रूराः पिंगाक्षाः क्रूरकर्मकाः ॥ ९६ ॥ वराहः ॥
अभ्युन्नताभिरल्पायुषोविशालोन्नताभिरतिस्फुरिवनः ॥ विषमभ्रुवोदरिद्राबालेंदुनतभ्रुवः सधनाः ॥ ९७ ॥ दीर्घासंसक्ताभिर्द्ध
निनःखंडाभिरर्थपरिहीनाः ॥ मध्यविनतभ्रुवोयेतेसक्तास्त्रीष्वगम्यासु ॥ ९८ ॥ अथललाटल० ॥ उन्नतविपुलैःशंखैर्धन्या
निम्नैः सुतार्थसंत्यक्ता ॥ विषमललाटविधनाधनवंतोर्द्धेंदुसदृशेन ॥ ९९ ॥ शुक्तिविशालैराचार्यताशिरासंततैरधर्मरताः ॥ उ
न्नतशिराभिराढ्यास्वस्तिकवत्संस्थिताभिश्च ॥ १०० ॥ निम्नललाटावधबंधभाणितःक्रूरकर्मनिरताश्च ॥ अभ्युन्नतैश्चभूपा
कृपणास्युःसंवृतललाटाः ॥ १ ॥ शिवः ॥ ललाटेचार्द्धचंद्राभेभवंतिपृथिवीश्वराः ॥ विपुलेनललाटेनधनार्थःसंभवेन्नरः ॥ २ ॥
अल्पेनतुललाटेनअल्पायुर्जायतेनरः ॥ तिलकंकुलिशंचापंललाटेयस्यदृश्यते ॥ ३ ॥ ईश्वरंतंविजानीयात्प्रमदाजनवल्लभः ॥ पंच
भिःशतमादिष्टंचतुर्भिःस्यात्लशीतिकं ॥ ४ ॥ रेखाभिस्तिसृभिःषष्ठिःद्वाभ्यांचविंशतिद्वयं ॥ रेखैकेनललाटेन विंशत्यायुर्विनिर्दि-
शेत् ॥ ५ ॥ रेखाःपंचललाटस्थाःसमाःकर्णांतगोचराः ॥ भणितंयस्यगंभीरंतंविद्यात्सकलायुषं ॥ ६ ॥ ललाटेयस्यदृश्यंतेरेखाद्वय
मनागमं ॥ षष्ठिवर्षविनिर्दिष्टंनारदस्यवचोयथा ॥ ७ ॥ अथरुदितं ॥ वराहः ॥ रुदितमदीनमनस्कस्निग्धंशुभावहंमनुष्याणां ॥
रूक्षंदीनंप्रचुराश्रुचैवनशुभप्रदंपुंसां ॥ ८ ॥ अथहसितं ॥ हसितंशुभदमकंपंसलिनीमिलितलोचनंचपापस्य ॥ दुष्टस्यहसितमस-
कृत्सोन्मादस्यासकृत्प्रांते ॥ ९ ॥ अथशिरः ॥ परिमंडलैर्गवाढ्याछत्राकारैःशिरोभिरवनीशाः ॥ चिपिटैःपितृमातृघ्नाः करोटस
दृशांचिरान्मृत्युः ॥ १० ॥ घटमूर्द्धात्व्यानरुचिर्द्धिमस्तकःपापकृद्धनैःस्त्यक्ताः ॥ निम्नंतुशिरोमहतांबहुनिम्नमनर्थदंभवति ॥ ११ ॥ शिवः
छत्राकारंनरेंद्राणांशिरोदीर्घंतुदुःखिनां ॥ अधमानांघटाकारंपापीनांतुपुटंपुनः ॥ १२ ॥ अथमुखलक्षणेपूर्वोक्ताद्विशेषमाह ॥ सा
ध्यमनूकंवक्त्रावृषशार्दूलसिंहगरुडमुखाः ॥ अप्रतिहतप्रतायाजितरिपवोमानवेंद्राश्च ॥ १३ ॥ वानरमहिषवराहाजतुल्यवदनाश्रुता-

र्थसुखभाजः॥ गर्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःस्वमुखाः॥ १४॥ अथ शिरकेशाः ॥ एकैकभवैःस्निग्धैः कृष्णैराकुंचितैर
भिन्नाग्रैः॥ मृदुभिर्नचातिबहुभिः केशैःसुखभाग्नरेंद्रोवा॥१५॥ बहुमूलविषमकपिलास्थूलस्फटिताग्रपरुषह्रस्वाश्च॥ अ
तिकुटिलाश्चातिघनाश्च मूर्द्धजा वित्तहीनानां॥ १६॥ अथ रुधिरल॰ ॥ शिवः॥ अलक्तकत्तसदृशं रक्तं जायते यस्य शोणितं॥ धन
वान्भोगवान्चैव सनरः परिकीर्तितः॥ १७॥ प्रवालस्निग्धरक्तंच शोणितं यस्य देहिनः॥ दैवतैः समवीर्यंच राजानंतं समादिशेत्
॥१८॥ पद्मपत्रसमं यस्य देहे भवति शोणितं॥ जायते बहुधाकन्या दुःखिताच सदा भवेत्॥ १९॥ गोमायुसदृशं यस्य श्वानोष्ट्रमहिष
स्यच॥ सभवेद्दुःखितो नित्यं धनहीनो नसंशयः॥२०॥ अथ गतिल॰॥ हस्तिहंससमा गत्याः पुरुषाः स्युर्नराधिपाः॥ वृषचास्तु
कानांच गतिर्भोगवतां भवेत्॥ २१॥ जलोर्मिसदृशीयत्र काकोलूकसमागतिः॥ द्रव्यक्षयकरीत्तेयादुःखशोकभयंकरी॥ २२॥ श्वानोष्ट्र
महिषाणांच खरशूकरयोस्तथा॥ गतिर्येषांसमाख्याता तेनराभाग्यवर्जिताः॥ २३॥ वराहः॥ शार्दूलहंसमदद्विपगोपतीनां तुल्या
भवंति गतिभिः शिखिनांच भूपाः॥ येषांच शब्दरहितं स्तिमितंच यानं तेपीश्वरा द्रुतपरिप्लुतगादरिद्रोः॥ २४॥ अथ देहस्य उत्तमा
दिल॰ ॥ अष्टशतं १०८ षण्णवतिः ९६ परिमाणं चतुरशीतिः ८४ रितिपुंसां॥ उत्तमसमहीनानां मंगुलसंख्यास्वमानेन॥ २५॥
अथ भारार्द्धमानोन्मानकः ॥ भारार्द्धतनुः सुखभाग्ध्वनिनोदुःखभाग्भवत्युनः॥ भारोतीवाद्यानामध्यर्द्धः स्वर्चधरणीशः॥ २६॥
विंशतिवर्षानारी पुरुषः खलु पंचविंशतिभिरष्टैः॥ अर्हति मानोन्मानं जीवितभागे चतुर्थेवा॥ २७॥ अथ पुरुषाणां दशविधप्रकृ
तिल॰ ॥ भूजलशिख्यनिलांबरसुरनररक्षः पिशाचकतिरश्चां॥ सत्वेन भवति पुरुषो लक्षणमेतद्भवति तेषां॥ २८॥ महीस्वभा
वः सुभपुष्पगंधः संभोगभोगी सुविसुस्थिरश्च॥ तोयस्वभावो बहुतो प्रयायी प्रियाभिभाषी रसभाजनश्च॥ २९॥ अग्निप्रकृत्या
चपलोनितीक्ष्णश्चंडः क्षुधालुर्बहुभोजनश्च॥ वायोः स्वभावेन चलः कृशाश्च क्षिप्रंचकोपस्यवशं प्रयाति॥ ३०॥ खप्रकृतिर्निपु
णोविवृत्तास्यः शब्दगतो कुशलः सुषिरागः॥ त्यागयुतः पुरुषो मृदुकोपस्नेहरतोथ भवेत्सुरसत्वः॥ ३१॥ मर्त्यसत्वसंयुतो गीतभू

षणप्रियः॥ संविभागशीलवान् नित्यमेवमानवः॥३२॥ तीक्ष्णप्रकोपः खलवेष्टितश्चपापश्चसत्वेननिशाचराणां॥ पिशाचसत्वश्च
पलोमलाको बहुप्रलापीचसमुल्वणांगः॥३३॥ भीरुः क्षुधालुर्बहुभुक्नयः स्यात् ज्ञेयः ससत्वेननरतिरश्चां॥ एवंनराणांप्रकृतिःप्रदि
ष्टायल्लक्षणज्ञाः प्रवदंतिसत्वं॥३४॥ अथसप्तधातुलक्षणं ॥सप्तभवंतिचसारामेदोमज्जात्वगस्थिशुक्राणि॥ रुधिरंमांसंचेति
प्राणभृतांतत्समासफलं॥३५॥ ताल्वोष्टदंतपालीजिह्वानेत्रांतपायुकरचरणैः॥ रक्तेतुरक्तसाराबहुसुखवनितार्थपुत्रयुताः॥३६॥
स्निग्धत्वचिर्द्धनिनो मृदुभिः सुभगाविचक्षणास्तनुभिः॥ मज्जामेदःसाराः सुशरीराःमित्रपुत्रयुताः॥३७॥ स्थूलास्थिरस्थिसारोबल
वान्विद्यांतगः सुरूपश्च॥ बहुगुरुः शुक्राः शुभगाः विद्वांसोरूपवंतश्च॥३८॥ उपचितदेहोविद्वान् धनीसुरूपश्चमांससारोयः॥ संहि
तइतिसुश्लिष्टाश्चसंधयः सुखभुजोज्ञेयाः॥३९॥ अथछायाल०॥ छायाशुभाशुभफलानिनिवेदयंतीलक्ष्मानुव्यपशुपक्षिषुल
क्षणज्ञैः॥तेजोगुणान्वहिरपिप्रविकाशयंतिदीपप्रभास्फटिकरत्नघटस्थितेवा॥४०॥ स्निग्धद्विजत्वनखरोमकेशाछायासुगंधाच
महीसमुत्था॥ तुष्ट्यर्थलाभाभ्युदयान्करोतिधर्मस्यचाहन्यतिहप्रवृद्धिं॥४१॥ स्निग्धासिताछहरितानयनाभिरामासौभाग्यमार्दव
सुखाभ्युदयान्करोति॥ सर्वार्थसिद्धिजननीजननीवचाथाछायाफलंतनुभृतांशुभमादधाति॥४२॥ चंडामृष्यापद्महेमाग्निवर्णायु
क्तातेजोविक्रमैः सप्रतापैः॥ आग्नेयीतिप्राणिनांस्याज्जयायक्षिप्रंसिद्धिंवांछितार्थस्यधत्ते॥४३॥ मलिनपरुषकृष्णापापगंधाऽनि
लोत्थाजनयतिवधशोकौसौख्यप्राणार्थनाशान्॥ स्फटिकसदृशरूपाभाग्ययुक्तात्युदारानिधिरिवगगनोत्थाश्रेयसांस्वच्छवर्णा
॥४४॥ छायाक्रमेणकुजलाग्न्यनिलांबरोत्थाकेचिद्वदंतिदशताश्चयथानुपूर्व्या॥ सूर्योजनयुरुक्तयमोडुपानांतुल्यास्तुलक्षण
फलैरितितत्समासः॥४५॥ अथपुनः अवशिष्टअंगुलिलक्षणविशेषमाह ॥ संजीवने ॥ अपर्वयस्यपर्वाणिदृश्यंतेंऽगुलिप
र्वसु॥ संरक्तांगुलयोयेचतेसर्वेचिरजीविनः॥४६॥ यस्यहस्तेपदेदीर्घाअंगुलीमिलिताथवा॥ सपुमान्विरहीनित्यंह्रस्वांगुलिदरि
द्रता॥४७॥अनामिकापर्वयदाविलंध्यतेकनीनिकावर्षशतंसजीवति॥ नवत्यशीतिर्विगमेचसप्ततिः समानभावेखलुषष्ठिजीवितं

॥४८॥ तारास्याङ्गवत्याश्चेदधिकापंचभिर्यवैः॥ तृतीयपर्वाणस्तर्हिशतंवर्षाणिजीवितं॥४९॥ चतुर्भिर्नवतिरामैः शरदीतिःस
मतिद्वये॥ समत्वेषष्ठिवर्षाणिहीनेहीनत्वमाप्नुयात्॥५०॥ पंचाशदेकयवतः चत्वारिंशत्यवद्वये॥ यवैस्त्रीभिर्न्यूनतायांत्रिंशद्देश्चवि
शतिः॥५१॥ पंचभिर्दशवर्षाणित्येवंनिर्णयमायुषि॥५१॥ अथआवर्तफलंविलासे ॥ आवर्त्तोदक्षिणेभागेदक्षिणःशुभकृ
न्नृणां॥ वामोवामेतिनिंद्यश्चदिगन्यत्वेतिमध्यमः॥ अथसर्वगात्रमिश्रफलं ॥उत्पातःपीठकोलक्ष्मतिलकंमशकोव्रणः॥
॥५३॥ स्पर्शनंस्फुरणंनृणांशुभायांगेप्रदक्षिणे॥ वामभ्रुवांपुनर्वामेत्र्यंशकल्पनरस्यच॥ घातोदक्षिणकेकैश्चिन्नरःस्यांगेशुभो
मतः॥ सुस्पष्टंदेहगेहस्याल्लक्षणंवाप्यलक्षणं॥५५॥ इतरद्बाध्यतेतेनबलवत्फलदंभवेत्॥ शिवः ॥नासिकानेत्रदंतोष्टकरवर्णाश्रयो
नृणां॥ ५६॥ समाःसमेनविज्ञेयाविषमाविषमेनतु॥ गतिस्वरास्थित्वन्मांसनेत्रहृद्श्रेष्ठकेधनी॥ ५७॥ अकर्मकठिनोहस्तौपादौचाध्व
निकोमलौ॥ यस्यपाणीचपादौचसनरःसुखमेधते॥५८॥ वराहः ॥यद्यद्गात्रंरूक्षंमांसविहीनंशिरावनद्धंच॥ तत्तदनिष्टंप्रोक्तंवि
परीतमतःशुभंसर्वं॥५९॥ श्रांतस्यपानमशनंचबुभुक्षितस्यपानंतृषापरिगतस्यभयेषुरक्षा॥ एतानियस्यपुरुषस्यभवंतिकालेधन्यं
वदंतिखलुतंनरलक्षणज्ञाः॥६०॥ इतिहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेमिश्रस्कंधेसामुद्रिकलक्षणाध्यायेसर्वपुरुषाणांअंगल
क्षणंसंपूर्णं ॥७॥ अथपंचमहापुरुषाणांलक्षणमाह ॥वराहः॥ ॥ताराग्रहैर्बलयुतैःस्वक्षेत्रस्वोच्चगैश्चतुष्टयगैः॥ पंच
पुरुषाःप्रशस्ताःजायंतेतानहंवक्ष्ये॥६१॥ अथगुर्वादिखेटबलेनपंचानांलक्षणं ॥ जीवेनभवतिहंसःसौरेणशशःकुजेनरुचकश्च
॥ भद्रोबुधेनबलिनामालव्योभवतिशुक्रेण ॥६२॥ सत्वमहीनंसूर्याच्छारीरंमानसंचचंद्रबलात्॥ यद्राशिभेदयुक्तावेतौतल्लक्षणः
सपुमान्॥६३॥ तद्धातुमहाभूतप्रकृतिद्युतिवर्णसत्वरूपाढ्यौ॥ अबलरविंदुप्लुतैःस्तैःसंकीर्णाःलक्षणैःपुरुषाः॥६४॥ भौमात्सत्वंगुरुता
बुधात्सुरेज्यात्स्वरःसितात्स्नेहः॥ वर्णःसौरादेषांगुणदोषैःसाध्वसाधुत्वं॥६५॥ संकीर्णास्युर्ननृपादशासुतेषांभवंतिसुखभाजः॥ रिपु
ग्रहनीचोच्चच्युतसत्सायनिरीक्षणैर्भेदाः॥६६॥ अथदेहदैर्घ्येणपंचानांलक्षणं ॥ षण्णवतिरंगुलानांव्यायामोदीर्घताचहंसस्य॥शशा१

रुचक१०२ भद्र१०५ मालव्य १०८ संज्ञितास्त्र्यंगुलविवृध्द्या॥ ६७॥ अथपुरुषाणांसत्वादिगुणत्रयस्यलक्षणं॥ ॥यःसात्विक
स्तस्यदयास्थिरत्वंसत्यार्जवंब्राम्हणदेवभक्तिः॥रजोधिकःकाव्यकलाक्रतुस्त्रीसंसक्तचित्तःपुरुषोतिशूरः॥६८॥तमोधिकोवंचयिता
परेषांमूर्खोलसक्रोधपरोतिनिद्रः॥मिश्रैर्गुणैःसत्वरजस्तमोभिर्मिश्रास्तुतेसप्तसहप्रभेदैः॥६९॥ अथमालव्यपुरुषलक्षणं ॥मा
लव्योनागनासासमभुजयुगलोजानुसंप्राप्तहस्तोमांसैःपूर्णांगसंधिःसमरुचिरतनुःमध्यभागेकृशश्च॥पंचाष्टौचोर्ध्वमास्यंश्रवणविवरयो
स्त्र्यंगुलोनंचतिर्यदीप्ताक्षंसत्कपोलंसममितदशनंनातिमांसाधरोष्टं॥ ७०॥ मालवात्सभरुकच्छसुराष्ट्रान्लाटसिंधुविषयप्रभृतींश्च॥
विक्रमार्जितधनोवतिराजापारियात्रनिधयःकृतबुद्धिः॥ ७१॥ सप्ततिवर्षोमालव्योयंमुंचतिसम्यक्प्राणांस्तीर्थे॥ लक्षणमेतत्सम्यक्प्रो
क्तंशेषनराणामतोप्रवक्ष्ये॥ ७२॥ ग्रंथांतरे ॥स्निग्धतनुर्बहुश्मश्रुसमेतःकुंचितकेशोबहुसुतयोषित्॥ वृषहयगामीकरिरथगोवा
करपादयोश्चपंचशंखानि॥७३॥ अथभद्रपुरुषल०२ ॥ वराहः॥उपचितसमवृत्तलंबबाहुर्भुजफगलप्रमितःसमुच्छ्रयोस्य
॥मृदुतनुघनरोमयोश्चगंडोभवतिनरःखलुलक्षणेनभद्रः॥ ७४॥त्वक्शुक्रसारःपृथुपीनवक्ष्यःसत्वाधिकोव्याघ्रमुखस्थिरश्च॥क्षमा
परोधर्मरतोगुणज्ञोगजेंद्रगामीबहुशास्त्रवेत्ता॥७५॥ प्राज्ञोवयुष्मान्सुललाटशंखःकलास्वभिज्ञोवृतिमात्सकुक्षिः॥सरोजगर्भ
द्युतिपाणिपादस्त्यागोस्तनासःसमसंहतभ्रूः॥७६॥ नवांबुसिक्तावनिपत्रकुंकुमद्विपेंद्रदानागुरुतुल्यगंधिता॥ शिरोरुहाश्चैकजकृ
ष्णकुंचितास्तुरंगनागोपमगूढगुह्यता॥ ७७॥हलमूसलगदासिशंखचक्रद्विपमकराब्जरथांकितांघ्रिहस्तः॥ विभवमपिजनोस्स-
वोभुजीतिक्षमतिहितस्वजनंस्वतंत्रबुद्धिः॥ ७८॥ अंगुलानिनवतिश्चषड्नान्युच्छ्रयेणतुलयापिभारः॥मध्यदेशनृपतिर्यदिपुष्टा-
स्त्यादयोस्यसकलावनिनाथः॥ ७९॥ भुक्तासम्यग्वसुधांशौर्य्येणोपार्जितामशीत्यब्दः॥ तीर्थेप्राणांस्त्यक्त्वाभद्रोदेवालयंयाति॥८०॥
अथशशपुरुषल०३ ॥ईषदंतुरकलनुद्विजनखःकोशोक्षणःशीघ्रगोविद्याधरस्तुवणिक्रियासुनिपुणःसंपूर्णगंडःशठः॥सेनानी
प्रियमैथुनःपरजनस्त्रीसक्तचित्तश्चलःशूरोवीरमतिर्वनाचलनदीदुर्गेषुशक्तःशशः॥८१॥ दीर्घोंगुलानांशतमष्टहीनंसाशंकचेष्टः

परंरंध्रविच्च ॥ सारोस्यमज्जानिभृतप्रचारः शाशोह्ययंनातिगुरुः प्रदिष्टः ॥ ८२ ॥ मध्येकृशःखेटकखड्गवीणापर्यंकमालामुरुजा
नुरूपा ॥ शूलोपमाश्चोर्ध्वगजाश्वरेषाः शशस्यपादोपगताः करेवा ॥ ८३ ॥ प्रात्यंतिकोमांडलिकोथवायंस्फिकृश्रावशूलारिवार्तमूर्तिः
॥ एवंशशः ससतिहायनोऽयंवैवस्वतस्यालयमभ्युपेति ॥ ८४ ॥ अथहंसपुरुषल० ४ ॥ रक्तंपीनकपोलमुन्नतनसंवक्त्रंस्कवर्णोप
मंवृत्तंवासशिरोक्षिणीमधुनिभेसर्वेचरक्तानखाः ॥ स्रक्कुदामांकुशशंखमत्स्ययुगलकल्वंगकुंभाबुजैश्चिन्हैर्हंसकलस्वनःस्कचरणोहं
सःप्रसन्नेंद्रियः ॥ ८५ ॥ रतिरंभसिशुक्रसारताद्विगुणामष्टशतींपलैर्मितः ॥ परिमाणमथास्यषड्युतानवतिःसंपरिकीर्तिताबुधैः ॥
॥ ८६ ॥ भुनक्तिहंसः खशशूरसेनगांधारगंगायमुनांतराणि ॥ शतंदशोनंशरदांनृपत्वंकृत्वावयांतेसमुपैतिमृत्यं ॥ ८७ ॥ अथरुच
कपुरुषल० ५ ॥ सुभ्रूकेशोरक्तःश्यामःकंबुग्रीवोव्यादीर्घास्यः ॥ क्रूरःश्रेष्ठोमंत्रीचोरस्वामीरुचकोव्यायामीच ॥ ८८ ॥ यन्मात्रमा
स्यंरुचकस्यदीर्घमध्यप्रदेशोचतुरस्रतासा ॥ तनुच्छविः शोणितमांससारोहंताद्विषांसाहसिसिद्धकार्यः ॥ ८९ ॥ खड्गांगवीणावृषचाप
वज्रशक्तिंदुशूलांकितपाणिपादः ॥ भक्तोगुरुब्राम्हणदेवतानांशतांगुलानांतुलयासहस्रं ॥ ९० ॥ मंत्राभिचारकुशलः कृशजानु
जंघोविंध्यससह्यगिरिगव्हरमुज्जयंती ॥ भुक्त्वाचसप्ततिसमारुचकोनरेंद्रः शस्त्रेणमृत्युमुपयात्यथवानलेन ॥ ९१ ॥ अथपंचसं
कीर्णपुरुषलक्षणमाह ॥ वराहः ॥ पंचापरेवामनकोजघन्यःकुब्जोपरोमांडलिकोऽथसामी ॥ पूर्वोक्तभूपानुचराभवंतिसंकीर्णसंज्ञाः
शृणुलक्षणैस्तान् ॥ ९२ ॥ अथवामनपुरुषल० ॥ संपूर्णांगोवामनोभग्नपृष्टः किंचिच्चोरुमध्यकक्षाप्रदेशो ॥ ख्यातोराज्ञोचेषभद्रानुजीवि-
स्फीतोदातावासुदेवस्यभक्तः ॥ ९३ ॥ अथजघन्यपुरुषल० ॥ मालव्यसेवीस्कमहास्कनामाखंडेंदुतुल्यश्रवणःस्कसत्वः ॥ शुक्रेण
सारःपिशुनःकविश्चरुक्षःछविःस्थूलकरांगुलीकः ॥ ९४ ॥ क्रूरोधनीस्थूलमतिःप्रतीतस्ताम्रछविःस्यात्परिहासशीलः ॥ उरोंघ्रिहस्तेव
रपाशशक्तिपरश्वधांकश्चजघन्यनामा ॥ ९५ ॥ कुब्जोनामायःसशुक्लोह्यधस्तात्क्षीणःकिंचित्पूर्वकायोनतश्च ॥ हंसःसेवीनास्तिको
थैरुपेतोविद्वान्शूरःसूचकःस्यात्कृतज्ञः ॥ ९६ ॥ कलास्वभिज्ञःकलहप्रियश्चप्रभूतभृत्यःप्रमदाजितश्च ॥ संपूज्यलोकंप्रजहा

त्यकस्मात्कुब्जोयमुक्तः सततोद्यतश्च ॥ १९७ ॥ इतिजघन्यः कुब्जश्च ॥ अथमांडलीकल० ॥ मांडलिकलक्षणमतोऽस्
चकानुचरोभिचारविकुशलः ॥ न्यायेनालादिषु कर्मसक्तविद्यासुचानुरतः ॥ १९८ ॥ वृद्धोकाकःस्वरः पुरुषोमूर्द्धजः शत्रुनाशनेकुशलः
॥ द्विजदेवयज्ञदानप्रसक्तधीः स्त्रीजितोमतिमान् ॥ १९९ ॥ अथसामीपुरुषलक्षणं ॥ सामीतियः सोतिविरूपदेहः शत्रानुगामीखलुदुर्भ
गश्च ॥ दातामहारंभसमासकार्यौगुणैः शशास्येवभवेत्समानः ॥ २०० ॥ ॥ अथवरलक्षणं ॥ विलासे ॥ ॥ वपुः शीलंकुलंवित्तंवयोवि
द्यासनाथता ॥ एतानियस्यविद्यंतेतस्मैदेयानिजात्मजा ॥ १ ॥ मूर्खनिर्धनदूरस्थशूरमोक्षाभिलाषिणां ॥ त्रिगुणाधिकवर्षाणांनदेयाकन्य
काबुधैः ॥ २ ॥ मार्तंडटीकायां ॥ अंधोमूकः क्रियाहीनश्चापस्मारीनपुंसकः ॥ दूरस्थः पतितः कुष्टीदीर्घरोगीवरोनसत् ॥ ३ ॥ यस्या
प्सुमज्जतेबीजंह्रादिमूत्रंचफेनितं ॥ पुमांस्याल्लक्षणैरेतैर्विपरीतैस्तुषंडकः ॥ ४ ॥ नात्यासन्नेनातिदूरेनात्याढ्येनातिदुर्बले ॥ वृत्तिही
नेचमूर्खेचषट्सुकन्यानदीयते ॥ ५ ॥ श्रीभागवते ॥ ययोरेवसमंवित्तंययोरेवसमंश्रुतं ॥ तयोर्विवाहोमैत्रीचनोत्तमाधमयोः क्व-
चित् ॥ ६ ॥ अपरीक्ष्यवरंकन्यांनिर्गुणायददातियः ॥ कुलंतस्यैवतच्छोकसंतप्ताविनिकृंतति ॥ ७ ॥ ॥ इतिश्रीहरिकृष्णवि-
निर्मितेबृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधेअष्टमेसामुद्रिकलक्षणाध्यायेपुरुषदेहांगलक्षणवर्णनंनामतृतीयप्रकरणंसमाप्तं ॥ ३ ॥
॥ श्रीगणेशायनमः ॥ अथस्त्रीलक्षणाख्यंचतुर्थप्रकरणंप्रारभ्यते ॥ प्रणम्यगणनायकंविविधभेदयुक्तंपुराकलंकथितवा-
नहंपुरुषदेहचिन्हात्मकं ॥ वदामिवनितांगलक्षणमथाद्यतूर्येग्रखिलंस्फुटप्रकरणेपरंविबुधव्यंकटास्यात्मजः ॥ १ ॥ अथस्त्रीलक्ष
णावर्णनेप्रयोजनमाह ॥ गृहाश्रमस्तस्वार्थायभार्यामूलंचतत्सुखं ॥ साचभार्याविनीताचेत्त्रिवर्गोविनयेध्रुवं ॥ २ ॥ दक्षाप्रजावतीस्त्र
स्त्रीप्रियवाक्वशंवदा ॥ गुणैरमीभिःसंयुक्तामाश्रीस्त्रीरूपधारिणी ॥ ३ ॥ अथविवाहोपयोगीकन्यालक्षणं ॥ स्कांदे ॥ गुरोरनुज्ञ
यास्नात्वाव्रतंत्वेदंसमाप्यच ॥ उद्वहेततोभार्यांसवर्णांसाधुलक्षणैः ॥ ४ ॥ जनेतुरसगोत्रायामातुर्याप्यसपिंडका ॥ दारकर्मणियो-
ग्यासाद्विजानांधर्मसिद्धये ॥ ५ ॥ स्त्रीसंबंधेप्यपस्मारीक्षयीश्वित्रीकुलंत्यजेत् ॥ अभिषस्तिसमाकर्कंतथाकन्याप्रसंत्यजेत् ॥ ६ ॥ रो

गहीनांभ्रातृमतींस्वस्मात्किंचिल्लघीयसीं ॥ उद्वहेतद्विजोभार्यांसौम्यासांमृदुभाषिणीं ॥ ७ ॥ नचातिरिक्तहीनांगीमतिदीर्घांनचाकृ
शां ॥ नालोमिकांनातिलोमांनास्निग्धस्थूलमौलिजां ॥ ८ ॥ मोहान्नसमुपयच्छेतकुलहीनांनकन्यकां ॥ हीनोपयमनाद्यातिसंता
नमपिहीनतां ॥ ९ ॥ ज्योतिर्निबंधे ॥ भुजंगविहंगमभीषणपादपनाम्नीलकाररेफांताः ॥ ऋक्षनदीनदसंज्ञानविवाह्याकन्यकास-
द्भिः ॥ १० ॥ ऋक्षंनक्षत्रंभल्लुकोवा ॥ किंच ॥ धान्यपर्वतपुष्पाख्यादासीनाम्नीचकन्यका ॥ कपिलाकृष्णवर्णाचपक्षीनाम्नीचवर्जिता
॥ ११ ॥ इतिकेचिन्मतंप्रोक्तंसाग्रंतद्धिमथोच्यते ॥ भुजंगादिप्रसिद्धार्थनाम्नींकन्यांविवर्जयेत् ॥ १२ ॥ वधूंसल्लक्षणोपेतांप्रसन्नांचकुलोद्भ
वां ॥ कन्यकांवृणुयात्रूपवतीमव्यंगविग्रहां ॥ १३ ॥ अर्चितंवचनमुन्नतमनोनिर्विशेषसुखदंद्वयोर्वपुः ॥ अस्तिचेदयपराङ्मुखीमतिर्ल
क्षणैःकिमपरैर्नृयोषितां ॥ १४ ॥ मनसश्चक्षुषोयस्मिन्वरेचस्यांचयोषिति ॥ संतोषोजायतेतत्रनान्यत्किंचिद्विचिंतयेत् ॥ १५ ॥
पितृशीलोत्तमाकन्यामातृशीलोत्तमोवरः ॥ समपृष्टस्तुल्यरूपोविवाहःसुखदोभवेत् ॥ १६ ॥ अथसल्लक्षणेपिपातिव्रत्य
प्रशंसामाह ॥ स्कांदे ॥ सल्लक्षणापिदुःशीलाकुलक्षणशिरोमणिः ॥ अलक्षणाऽपियासाध्वीसर्वलक्षणभूस्तुसा ॥ १७ ॥
सल्लक्षणासच्चरित्रासाध्वीनापतिदेवता ॥ विश्वेशानुग्रहादेवगृहेयोषिदवाप्यते ॥ १८ ॥ अथतादृशप्राप्तस्त्रियःफलमाहश्री
भागवतेकश्यपोक्तिः ॥ सर्वाश्रमानुपादायस्वाश्रमेणकलत्रवान् ॥ व्यसनार्णवमत्येतिजलयानैर्यथार्णवं ॥ १९ ॥ यामाश्रित्यें
द्रियारातिंदुर्जयानितराश्रमैः ॥ वयंजयेमहेलाभिर्दस्यून्दुर्गपतिर्यथा ॥ २० ॥ अथसल्लक्षणरूपलावण्यप्राप्तेःकारणमाह
॥ काशिखंडे ॥ अलंकृताःस्ववासिन्योयाभिःप्राक्तनजन्मनि ॥ नानाविधैरलंकारैस्ताःसुरूपाभवंतिहि ॥ २१ ॥ सतीर्थेषुवपु
र्याभिःक्षयितंवाविवाहितं ॥ तालावण्यतरंगिण्योभवंतीहसल्लक्षणाः ॥ २२ ॥ अर्चिताजगतांमातायाभिर्मृडवधूरिह ॥ ताभव
तिसच्चरित्रायोषास्वाधीनभर्तृका ॥ २३ ॥ स्वाधीनभर्तृकाणांचसुशीलान्यांमृगीदृशां ॥ स्वर्गापवर्गावत्रैवसल्लक्षण्यफलंहितत् ॥
॥ २४ ॥ अथलक्षणविचारप्रयोजनं ॥ सुलक्षणैःसुचरितैरपिमंदायुषंपतिं ॥ दीर्घायुष्यंप्रकुर्वंतिप्रमदाःप्रमदास्पदं ॥ २५ ॥

अतः सल्लक्षणा योषाः परिणेया विचक्षणैः ॥ लक्षणानि परीक्ष्यादौ हित्वा दुर्लक्षणान्यपि ॥ २६ ॥ अथ विवेकविलासे पुनर्विशेषः
धराधान्यलतागुल्मसिंहव्याघ्रफलाभिधां ॥ त्यजेन्नारीं प्रयत्नेन स्वैराचारप्रियायतः ॥ २७ ॥ नापरीक्ष्य स्पृशेत्कन्यामविज्ञातां कदाचन ॥
निघ्नंति येन योगैस्ताः कदाचिद्रक्षनिर्मिते ॥ २८ ॥ अथ त्रिविधविषकन्यालक्षणं ॥ महौषधप्रयोगेण कन्या विषमयी किल ॥ जाते
ति श्रूयते ज्ञेया लैरेतैः सापि लक्षणैः ॥ २९ ॥ गणपतौ ॥ सूर्यभौमार्कवारेषु तिथिर्भद्राशताभिधं ॥ आश्लेषाकृत्तिकाचेत्स्यात्तत्रजा
ता विषांगना ॥ ३० ॥ तनुर्लग्ने रिपुक्षेत्रे संस्थितः पापखेचरः ॥ द्वौ सौम्यौ चापि योगेस्मिन् संजाता विषकन्यका ॥ ३१ ॥ लग्ने शनैश्चरो यत्स्या
त्सुतेऽर्कोनवमे कुजः ॥ विषाख्या सापि नोद्वाह्या त्रिविधा विषकन्यका ॥ ३२ ॥ हरिकृष्णः ॥ तिथिनक्षत्रवाराणां याप्रोक्ता वि
षनाडिका ॥ तदुत्पन्नाच या कन्या सा विषाख्यापरेऽजगुः ॥ ३३ ॥ आसामुपायः ॥ गणपतौ ॥ सावित्र्यादिव्रतं कृत्वा वैधव्यविनि
वृत्तये ॥ अश्वत्थादिभिरुद्वाह्याद्द्यात्तां चिरजीविने ॥ ३४ ॥ इति विषकन्या ॥ अथ पुनरपि कन्यालक्षणमाह ॥ विलासे ॥
यस्याः केशांबरकस्पर्शात्म्लायंति कुसुमस्रजः ॥ स्नानांभसि विपद्यंते बहवः क्षुद्रजंतवः ॥ ३५ ॥ म्रीयंते मत्कुणास्तल्पे तथा यूका-
श्चवाससी ॥ वातश्लेष्मव्यथामुक्ता सा च पित्तोदयान्विता ॥ ३६ ॥ अथ कन्यालक्षणप्रसंगादन्यस्त्रीनिर्णयमाह ॥ गुरुस्वामिसु
हृच्छिष्यस्वजनांगनया सह ॥ मातृयामिस्रुतत्वेन व्यवहर्तव्यमुत्तमैः ॥ ३७ ॥ संबंधिनी कुमारी च लिंगिनी शरणागता ॥ वर्षाधिका
च पूज्यत्व सकल्पेन विलोक्यते ॥ ३८ ॥ सदोषां बहुलोभां च बहुग्रामांतरप्रियां ॥ अनीप्सितसमाचारां चंचलां चरजस्वलां ॥ ३९ ॥
अशौचां हीनवर्णां वा विवृद्धां कौतुकप्रियां ॥ अनिष्टां स्वजनद्वेषां सगर्वां नाश्रयेत्स्त्रियं ॥ ४० ॥ परस्त्री विधवा भर्तृत्यक्तात्यक्तव्रता
पि चा ॥ राजकुलप्रतिबद्धा विवर्ज्या यत्नतो बुधैः ॥ ४१ ॥ दुर्गदुर्गतिदूतीषु वैरचित्रैकभित्तिषु ॥ साधुवाददुषस्त्रीषु परस्त्रीषु रमेतन ॥
॥ ४२ ॥ जगत्समक्षं स्त्रीपुंसौ विवाहे दक्षिणं करं ॥ अन्योन्यव्यवहाराय दत्तः किल परस्परं ॥ ४३ ॥ ततो व्यभिचरंतौ तौ निजं पुण्यं वि
लुप्यतः ॥ अन्योन्यघातिनौ स्यातां परस्त्रीपुंसगावपि ॥ ४४ ॥ स्कांदे काशिखंडे ॥ सदा गृहीतस्करबंधुं क्ते स्त्री लक्षणवती यदि ॥

अतःस्करवसमृद्ध्यर्थआदौलक्षणमीक्षयेत् ॥ ४५॥ अथाष्टौलक्षणभूमिका ॥ वपुरावर्तगंधाश्च छायासत्वंस्वरोगतिः ॥ वर्ण
श्चेत्यष्टधाप्रोक्ताबुधैर्लक्षणभूमिका ॥ ४६॥ अथषट्षष्टिलक्षणांगस्थाननामानि ॥ उक्तंकाशिखंडे ॥ आपादतलमार
भ्ययावन्मौलिरुहंक्रमात् ॥ शुभाशुभानिवक्ष्यामिलक्षणानिमुनेशृणु ॥ ४७॥ आदौपादतलेरेखास्ततोंगुष्ठांगुलीनखाः ॥ पृष्टं
गुल्फद्वयंपार्ष्णीजंघेरोमाणिजानुनी ॥ ४८॥ ऊरूकटीनितंबस्फिग्भगोजघनभस्तिके ॥ नाभिःकुक्षिद्वयंपार्श्वोदरमध्यवलित्रयं
॥ ४९॥ रोमालीहृदयंवक्ष्योवक्षोजद्वयचुचुकं ॥ जत्रुस्कंधोंसकक्षोदोर्मणिबंधकरद्वयं ॥ ५०॥ पाणिपृष्ठपाणितलंरेखांगुष्ठांगुली
नखाः ॥ षष्ठिः कृकाटिकाकंठेचुबुकंचहनुद्वयं ॥ ५१॥ कपोलौवक्त्रमधरोऽत्तरोष्ठद्विजजिह्विका ॥ घंटिकातालुहसितंनासिकाक्षुत
मक्षिणी ॥ ५२॥ पक्ष्मभ्रूकर्णभालानिमौलिसीमंतमौलिजाः ॥ षष्ठिःपडुत्तरायोषिदंकलक्षणसत्वनि ॥ ५३॥ अथपादतलयोः
लक्षणंशब्दौस्पष्टार्थौ ॥ स्त्रीणांपादतलंस्निग्धंमांसलंमृदुलंसमं ॥ अस्वेदमुष्णमरुणंबहुभोगोचितंस्मृतं ॥ ५४॥ रुक्षंविवर्णपरुषं
खंडितप्रतिबिंबकं ॥ शूर्पाकारंविशुष्कंचदुःखदौर्भाग्यसूचकं ॥ ५५॥ पादौसमांगुलीस्निग्धौभूम्यांयदिप्रतिष्ठितौ ॥ यस्याःसकोम
लौरक्तौसाकन्यागृहमंडिनी ॥ ५६॥ अथपादरेखाफलं ॥ स्कंदः ॥ चक्रस्वस्तिकशंखाब्जध्वजमीनातपत्रवत् ॥ यस्याःपाणित
लेरेखासाभवेत्क्षितिपांगना ॥ ५७॥ भवेदखंडभोगायोर्ध्वमध्यांगुलिसंयुता ॥ रेखास्तुसर्पकाकाभादुःखदारिद्रसूचका ॥ ५८॥ अ
थपादांगुष्ठलक्षणं ॥ उन्नतोमांसलोंगुष्ठोवर्तुलोऽतुलभोगदः ॥ वक्रोहस्वश्चचिपिटः सुखसौभाग्यभंजकः ॥ ५९॥ विधवा विपुले
नस्याद्दीर्घांगुष्ठेनदुर्भगा ॥ विलासे ॥ अल्पवृत्तेनवक्रेणवक्रेनलघुनापिच ॥ ६०॥ चिपटेनातिरक्तेनपादांगुष्ठेनदुःखिता ॥ अ
थपादांगुलिलक्षणं ॥ स्कंदः ॥ मृदवोंगुलयःशस्ताघनावृत्ताःसमुन्नताः ॥ ६१॥ दीर्घांगुलीभिःकुलटाकृशाभिरतिनिर्धना ॥ ह्रस्वा
युषाचह्रस्वाभिकुटिलाभिकुटीलता ॥ ६२॥ चिपटाभिर्भवेद्दासी विरलाभिर्दरिद्रिणी ॥ परस्परंसमारूढायदांगुल्योभवंतिहि ॥ ६३॥
हत्वाबहूनपिपतीनूपरप्रेष्यातदाभवेत् ॥ उच्छलनूधूलिचरणाकुलत्रयविनाशिनी ॥ ६४॥ यस्याःकनिष्ठिकाभूमिंनगच्छंत्याः

परिस्पृशेत् ॥ सानिहत्यपतिंयोषांद्वितीयंकुरुतेपतिं ॥ ६५ ॥ अनामिकांचमध्याचयस्याभूमिंनसंस्पृशेत् ॥ पतिद्वयंनिहंताद्याद्वितीयाच
पतित्रयं ॥ ६६ ॥ पतिहीनत्वकारिण्यौहीनेतेद्वेइमेयदि ॥ प्रदेशिनीभवेद्यस्याअंगुष्ठाव्यतिरेकिणी ॥ ६७ ॥ कन्यैवकुलटाटासास्यादेषए
वविनिश्चयः ॥ विलासे ॥ उच्छलनूधूलिचरणासर्वस्थूलमहांगुली ॥ ६८ ॥ बहिर्विनिपतत्यादादीर्घपादप्रदेशिनी ॥ अथपादनखा
॥ स्निग्धाःसमुन्नतास्ताम्राश्रताःपादनखाःशुभाः ॥ ६९ ॥ अन्यथाअशुभाइत्यर्थः ॥ अथपादपृष्ठलक्षणं ॥ स्कंदः ॥ राज्ञि
त्वसूचकंस्त्रीणांपादपृष्ठंसमुन्नतं ॥ अस्वेदमसिराढ्यंचमसृणंमृदुमांसलं ॥ ७० ॥ दरिद्रामध्यनम्रेणसिरालेनसदाध्वग ॥ ॥ रोमाढ्येनभवे
द्दासीनिर्मांसेनचदुर्भगा ॥ ७१ ॥ अथगुल्फद्वयलक्षणं ॥ गुल्फद्वयंनामपादग्रंथिद्वयं ॥ गूढौगुल्फौशिरावायोक्तावशिरालौसुवर्तुलौ
॥ निम्नौस्थूलौचशिथिलौदृश्यौदौर्भाग्यसूचकौ ॥ ७२ ॥ अथपार्ष्णीलक्षणं ॥ पार्ष्णिनामगुल्फयोरधःपादयोःपश्चाद्भागौ ॥ ता
ग्रंथिघुटिकेगुल्फौपुमान्पार्ष्णिस्तयोरधः इत्यमरः ॥ समेपार्ष्णीशुभानारीपृथुपार्ष्णीचदुर्भगा ॥ कुलटोन्नतपार्ष्णीस्यात्दीर्घपा
र्ष्णीचदुःखभाक् ॥ ७३ ॥ अथजंघालक्षणं ॥ जंघानामप्रसृतेजानुनोरधोभागौ ॥ रोमहीनेसमेस्निग्धेयज्जंघेसमवर्तुले ॥ सारा
जपत्नीभवतिविसिरेस्कमनोहनो ॥ ७४ ॥ उद्बद्धपिंडिकास्थूलजंघावायसजंघिका ॥ निर्मांसघटबुध्नाभाविश्लिष्टकृशजानुका ॥ ७५ ॥
अथजानुलक्षणं ॥ जानुनीनामउरुपर्वाणोभाषायांघूटणइतिख्यातौ ॥ जंघातुप्रसृताजानुरुपर्वास्त्रीवदस्त्रियामित्यमरः ॥ वृत्तंपिशित
संमग्नंजानुयुग्मंप्रशस्यते ॥ निर्मांसस्वैरचारिण्यादरिद्रायाश्चविस्लथं ॥ ७६ ॥ अथरोमकूपलक्षण ॥ एकरोमाराजपत्नीद्विरोमा
पिसुखास्पदा ॥ त्रिरोमारोमकूपेषुभवेद्वैधव्यदुःखभाक् ॥ ७७ ॥ अथउरुलक्षणं ॥ उरुसक्थिनीजानुनोरुपरिभागौ ॥ विसिरैः
करभाकारैःरुरुभिर्मसृणैर्घनैः ॥ सुवृत्तैरोमरहितैर्भवेयुर्भूपवल्लभाः ॥ ७८ ॥ वैधव्यंरोमशैरुक्तंदौर्भाग्यंचिपिटैरपि ॥ मध्यछिद्रैर्महा
दुःखंदारिद्र्यंकठिनत्वचैः ॥ ७९ ॥ अथकटिल० ॥ कटीनामउन्नतामांसखंडेषुश्रोण्याविनियावत् ॥ चतुर्भिरंगुलैःशस्ताकटिर्विंशति
संयुतैः ॥ समुन्नतनितंबाढ्याचतुरस्रामृगीदृशां ॥ ८० ॥ विनताचिपटादीर्घानिर्मांसासंकटाकटिः ॥ ह्रस्वारोमयुतानार्याःदुःखवैध

व्यसूचिका॥८१॥ अथनितंबलक्षणं ॥ नितंबौचस्त्रीकटयोः पश्चाद्भागौकटिःश्रोणिः ककुद्मतिपश्चान्नितंबःस्त्रीकटयाइत्य
मरः॥ नितंबबिंबोनारीणामुन्नतोमांसलः पृथुः॥ महाभोगायसंप्रोक्तस्तदन्योऽशर्मणेमतः॥८२॥ नितंबबिंबमुक्तांगं विस्तीर्णंश
स्यतेस्त्रियः॥ मध्यंवलित्रयोपेतंकृष्णंचशफरोमकं॥८३॥ अथस्फिकूलक्षणं ॥ स्फिचौनामकटिप्रांत्यौस्त्रियःस्फिचौकटी
प्रांत्याविंत्यमरः॥ कपित्थफलवद्वृत्तौमृदुलौमांसलौघनौ॥ स्फिचौबलिविनिर्मुक्तौरतिसौख्यविवर्द्धनौ॥८४॥ अथभगलक्ष
णं ॥ भगोयोनिर्द्वयोरित्यमरः॥ शफभः कमठप्रष्टाभोगजस्कंधोपमोभगः॥ वामोन्नतस्तुकन्याजः पुत्रदोदक्षिणोन्नतः॥८५॥
आखुरोमागूढमणिःस्कश्लिष्टःसंहतःपृथुः॥ तुंगःकमलपर्णाभःशुभोश्वत्थदलाकृतिः॥८६॥ कुरंगखुररूपोयः चुल्लिकोदरसं
न्निभः॥रोमशोविवृतास्यश्चदृश्यमध्योऽतिदुर्भगः॥८७॥ शंखावर्तोभगोयस्याः सागर्भंइहनेच्छति॥ चिपिटः कर्परकारः किंक
रीपददोभगः॥८८॥ कर्प्परः भग्नघटखर्परः॥ वंशवेतसपत्राभोगजरोमोच्चनासिकः विकटः कुटिलाकारोलंबगल्लस्तथाऽशफ-
भः॥८९॥ शिवः ॥ आवर्तस्तुभवेद्यस्याः भगस्योपरिमस्तके॥ तस्याविवर्द्धतेपुत्रोधनधान्यसमन्वितः॥९०॥ गुह्यांतेतिलकंय
स्यारक्तंकुंकुमसंन्निभं॥ अथवादक्षिणेभागेप्रशस्तासानिगद्यते॥९१॥ कृष्णोस्निग्धेशोभनेचधनधान्यस्कृतान्विता॥ निर्मांसदी
र्घसच्छिरश्शफ्केदुःखदरिद्रभाक्॥९२॥ अथशरीरगंधफलं ॥ धान्यगंधाचयानारीनिंबगंधाचयाभवेत्॥ वर्जनीयाप्रयत्नेनय
दीच्छेत्स्थिरंजीवितं॥९३॥ क्षीरगंधांत्यजेत्कन्यांतथैवकटुगंधिनीं॥ रक्तगंधांचगोमूत्रगंधांहत्तलिगंधकां॥९४॥ लाक्षागंधातुंबि
गंधातस्यानैवभवेत्सुतिः॥उग्रगंधांतथामत्स्योदरीगंधांविवर्जयेत्॥९५॥ चंपकादिकपुष्पाणांयदिगंधोभवेत्तनौ॥ सुभगासासृजे-
न्नित्यंभर्तारंवशवर्तिनं॥९६॥ अथजघनल० ॥ जघनंस्त्रीकटयाःपुरोभागःभगस्यउपरिभागास्त्रीकटयाः क्लीबेतुजघनंपुर
इत्यमरः॥ भगस्यभालंजघनंविस्तीर्णंतुंगमांसलं॥ मृदुलंमृदुरोमाढ्यंदक्षिणावर्त्तकंशफभं॥९७॥ वामावर्तंचनिर्मांसंभुग्नंवैधव्य
सूचकं॥संकटस्थपुटंरुक्षंजघनंदुःखदंसदा॥९८॥ अथबस्तिलक्षणं ॥ बस्तिर्नामनाभेरधोभागः ॥ बस्तिर्नाभेरधोद्वयोरि

त्यमरः ॥ वस्तिः प्रशस्ताविपुलामृद्वीस्तोकसमुन्नता ॥ रोमशावसिरालाचरेखांकानैवशोभना ॥९९॥ अथनाभिलक्षणं ॥ गं-
भीरादक्षिणावर्तानाभिः स्यात्सुखसंपदे ॥ वामावर्तासमुत्तानाव्यक्तग्रंथिर्नशोभना ॥१००॥ शिवः ॥ नाभेरधोभवेद्यस्याः लांछनं
कनकोपमं ॥ कुंकुमोदकसंकाशंप्रशस्तासानिगद्यते ॥१॥ मृदंगयवकूष्मांडोदरिकात्यक्तनाभिका ॥ दधतीवलिनंरामावर्तिनंकुक्षि
मुन्नतं ॥२॥ अथकुक्षिलक्षणं ॥ कुक्षिर्जठरं ॥ पिचिंडकुक्षीजठरोदरतुंदमित्यमरः ॥ स्कंधः ॥ सूतेसूतान्बहून्नारीपृथुकु-
क्षिः सुखास्पदं ॥ क्षितिशंजनयेत्पुत्रंमंडूकाभेनकुक्षिणा ॥३॥ उन्नतेनवलीभाजासावर्तेनापिकुक्षिणा ॥ वंध्याप्रव्रजितादासीक्रमा
द्योषाभवेदिह ॥४॥ अथपार्श्वलक्षणं ॥ पार्श्वनामबाहुमूलस्यअधोभागः ॥ पार्श्वमस्त्रीतयोरधइत्यमरः ॥ समैः समांसैर्मृदुभि
र्योषिन्मध्याग्रास्थिभिः शुभैः ॥ पार्श्वैसौभाग्यसुखयोर्निर्धानंस्यादसंशयं ॥५॥ यस्याद्दृश्यसिरेपार्श्वेउन्नतेरोमसंयुते ॥ निरपत्या
चदुःशीलासाभवेद्दुःखशोकविधिः ॥६॥ अथउदरलक्षणं ॥ उदरंचयद्यपिकुक्ष्युदरयोः पर्यायत्वंतथापिमध्यप्रदेशउदरंतदुभ
यपार्श्वप्रदेशः ॥ कुक्षिरितिज्ञातव्यंअतएवकुक्षिद्वयमितिस्थानगणनाप्रसंगेपूर्वमुक्तं ॥ उदरेणातिसूक्ष्मेणविसिरेणमृदुत्वचा ॥
योषिद्भवतिभोगाढ्या नित्यमिष्टान्नसेविनी ॥७॥ कुंभाकारंदरिद्रायाजठरंच मृदंगवत् ॥ कूष्मांडाभंयवाभंचादुःपूरंजायतेस्त्रियः
॥८॥ सुविशालोदरीनारी निरपत्याचदुर्भगा ॥ प्रलंबजठराहंतिश्वसुरंचापिदेवरं ॥९॥ अथमध्यलक्षणंवलिलक्षणंच ॥
मध्यमंचावलग्नंच मध्योस्त्री द्वौपरौद्वयोरित्यमरः ॥ मध्यक्षामाचसुभगाभोगाढ्यासुवलित्रया ॥ अथरोमालिलक्षणं ॥ ऋज्वी
तन्वीचरोमालियस्याः साशर्मभूर्मम ॥ कपिलाकुटिलास्थूलाविच्छिन्नारोमराजिका ॥ चौरवैधव्यदौर्भाग्यं विदध्यादिहयोषितां
॥११॥ शिवः ॥ रोमैः कनकवर्णैश्च नाभौत्रिवलिमुद्धृता ॥ जंघोष्टाश्चैवनिर्लोमासानारीनृपवल्लभा ॥१२॥ अल्पस्वेदाचाल्परो
मानिंद्राभोजनदुर्बला ॥ गात्रेयस्यानरोमाणिनारीणांलक्षणंशुभं ॥१३॥ अथहृदयलक्षणं ॥ हृदाधारउदरादूर्ध्वप्रदेशः ॥
निर्लोमहृदयंयस्याः समंनिम्नत्ववर्जितं ॥ ऐश्वर्यंचाप्यवैधव्यंप्रियप्रेमवसालभेत् ॥१४॥ विस्तीर्णहृदयायोषापुंश्चलीनिर्दयातथा


उद्भिन्नरोमहृदया पतिंहंति विनिश्चितं ॥१५॥ अथवक्षस्थललक्षणं ॥ वक्षः उरः ॥ उरोवत्संचवक्षश्चेत्यमरः ॥ अष्टादशांगुलन्यूना
धिकावक्षोरुहांतरा ॥ तिलकंलांछवत्सामं बिभ्राणावामकेस्तने ॥१६॥ अष्टादशांगुलततमुरः पीवरमुन्नतं ॥ सुखायदुःखायभवे
त्रोमशंविशामंपृथुः ॥१७॥ अथस्तनद्वयलक्षणं ॥ वक्षोजद्वयंस्तनद्वयं ॥ घनौवृत्तौदृढौपीनौसमौशस्तौपयोधरौ ॥ स्थूलाग्रौवि
रलौशुष्कौवामोरूणांनशर्मदौ ॥१८॥ दक्षिणोन्नतवक्षोजा पुत्रिणीत्वग्रणीर्मता ॥ वामोन्नतकुचासूते कन्यांसौभाग्यसुंदरी ॥१९॥ अर
घट्टघटीतुल्यौकुचौदौःशील्यसूचकौ ॥ पीवरास्योसांतरालौपृथूपत्तौनशोभनौ ॥२०॥ मूलेस्थूलौक्रमकृशावग्रेतीक्ष्णौपयोधरौ ॥
सुखदौपूर्वकालेतुपश्चादत्यंतदुःखदौ ॥२१॥ शिवः ॥ स्तनौचद्युन्नतौस्निग्धौशिरारोमविवर्जितौ ॥ अचंचलौचसतेजौचसासौ
भाग्यवतीभवेत् ॥२२॥ यस्याः पयोधरेवामे असितंतिलकंभवेत् ॥ कर्णेकंठेसुपुत्राढ्यासाकन्यासुखदायिनी ॥२३॥ अथचुचुक
स्तनाग्रलक्षणं ॥ चुचुककुचाग्रंस्यादित्यमरः ॥ स्कंदः ॥ सुदृशांचुचुकयुगंशस्तंश्यामंसुवर्तुलं ॥ अंतर्मग्नंचदीर्घंचकृशंक्लेशा
यजायते ॥२४॥ अथजत्रुलक्षणं ॥ जत्रुस्कंधस्यसंधिः ॥ संधिस्तस्यैवजत्रुणीइत्यमरः ॥ पीवराभ्यांचजत्रुभ्यांधनधान्यनि
धिर्वधुः ॥ श्लथास्थिभ्यांचनिम्नाभ्यांविषमाभ्यांदरिद्रिणी ॥१५॥ अथस्कंधलक्षणं ॥ स्कंधश्चभुजशिरः ॥ स्कंधोभुजशि
रोऽसोस्त्रीत्यमरः ॥ अबंधावनतौस्कंधौअदीर्घावकृशौशुभौ ॥ वक्रौस्थूलौचरोमाढ्यौप्रेष्यवैधव्यसूचकौ ॥ २६॥ अथअंसक
लक्षणं ॥ अंसश्चतस्यैवोपरिभागइत्यवांतरभेदान्नपौनरुक्त्यं ॥ निगूढसंधिरंसस्थागौशुभावंसौसुसंहतौ ॥ वैधव्यदौसमुच्चाग्रौ
निर्मांसावतिदुःखदौ ॥२७॥ अथकक्षलक्षणं ॥ कक्षश्चबाहुमूलं ॥ बाहुमूलेउभेकक्षावित्यमरः ॥ कक्षेसूक्ष्मेरोमेन्चतुं
गेस्निग्धेचमांसले ॥ शस्तेनसस्तेगभीरेसिरालेस्वेदमेदुरे ॥२८॥ भुजद्वयलक्षणं ॥ दोर्हस्तः ॥ भुजबाहुप्रकोष्ठोदोरित्यमरः ॥
स्यातांदोष्णौसुनिर्दोषौगूढास्थिग्रंथिकोमलौ ॥ विसिरौचविरोमाणौसरलौहरिणीदृशां ॥२९॥ व्यधव्यस्थूलरोमाणौह्रस्वौदौर्भा
ग्यसूचकौ ॥ परिक्लेशायनारीणांपरिदृश्यशिरौभुजौ ॥३०॥ अथमणिबंधावधिकरद्वयस्यलक्षणं ॥ अंभोजमुकुलाकार


मंगुष्ठांगुलिसन्मुखं ॥ हलद्वयं मृगाक्षीणां बहुभोगाय जायते ॥ ३१ ॥ अथ पाणिपृष्टलक्षणं ॥ विरोमविशिरं हस्तं पाणिपृष्टं प्र
मुन्नतं ॥ वैधव्यहेतु रोमाढ्यं निर्मांसं स्नायुमत्यजेत् ॥ ३२ ॥ अथ पाणितललक्षणं ॥ मृदुमध्योन्नमं रक्तं तलं पाण्योररंध्रकं ॥ प्रश
स्तं स्वल्परेखाढ्यं अल्परेखं शुभप्रियं ॥ ३३ ॥ विधवा बहुरेखेन विरेखेन दरिद्रिणी ॥ भिक्षुकी सुशिराढ्येन नारी करतलेन वै ॥ ३४ ॥
अथ करतले मत्स्यादिचिन्हफलं ॥ रक्ता व्यक्ताश्च गंभीराः स्निग्धाः पूर्णाश्च वर्तुलाः ॥ कररेखांगनायस्याः शुभा भाग्यानुसारतः ॥ ३५
॥ मत्स्येन शुभगा नारी स्वस्तिकेन वस्त्रप्रदा ॥ पद्मेन भूपतेः पत्नी जनयेद् भूपतिं सुतं ॥ ३६ ॥ चक्रवर्तिस्त्रिया पाणौ नंद्यावर्तः प्रदक्षिणं
॥ शंखातपत्रकमठाः नृपमातृप्रसूचकाः ॥ ३७ ॥ तुलामानाकृती रेखे वणिक्पत्नीत्वहेतुके ॥ गजवाजिवृषाकाराः करे वामे मृगी
दृशां ॥ ३८ ॥ रेखाः प्रासादवज्राभा ब्रूयुस्तीर्थकरं सुतं ॥ कृषीवलस्य पत्नी स्याच्छकटेन युगेन वा ॥ ३९ ॥ चामरांकुशकोदंडै राजप
त्नी भवेद्ध्रुवं ॥ अंगुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकां ॥ ४० ॥ यदि सा पतिहंत्री स्यात् दूरतस्तां त्यजेत्सुधीः ॥ त्रिशूलासिगदाश
क्तिदुंदुभ्याकृतिरेखया ॥ ४१ ॥ नितंबिनी कीर्तिमती त्यागेन पृथिवीतले ॥ कंकजंबूकमंडूकवृषवृश्चिकभोगिनः ॥ ४२ ॥ रासभो
ष्ट्रबिडालास्यकरस्था दुःखदाः स्त्रियः ॥ शिवः ॥ यस्याः पाणितले रेखा प्रासादस्तोरणाकृतिः ॥ ४३ ॥ अपि दासकुलेजा
ता नरेंद्रं लभते पतिं ॥ कुंडले च तया चक्रे सा नारी पुत्रिणी भवेत् ॥ ४४ ॥ पतिसंतानरेखादि विचारश्च विशेषतः ॥ पूर्वरेखादि
मर्षाख्ये प्रकर्णे कथितो मया ॥ ४५ ॥ अथ करांगुष्टलक्षणं ॥ शुभदः सरलोंगुष्ठो वृत्तो वृत्तनखो मृदुः ॥ अथ करांगु
ल्यः ॥ अंगुल्यश्च सुपर्वाणो दीर्घा वृत्ताः क्रमात्कृशाः ॥ ४६ ॥ चिपिटाः स्थपुटा रुक्षाः पृष्टरोमयुजोशुभाः ॥ अतिह्रस्वाः कृशा वक्रा
विरला रोगहेतुकाः ॥ ४७ ॥ दुःस्वायांगुलयः स्त्रीणां बहुपर्वसमन्विताः ॥ अथ नखलक्षणं ॥ अरुणाः शशिखास्तुंगाः कर
जाः सदृशांशुभाः ॥ ४८ ॥ निम्ना विवर्णाः शुक्त्याभाः पीना दारिद्र्यदायकाः ॥ नखेषु बिंदवः श्वेताः प्रायः स्युः स्वैरिणी स्त्रियः
॥ ४९ ॥ सपुष्पाश्च खरा श्वेत नखाः शूर्पनखी तथा ॥ पुरुषा अपि जायंते दुःखिताः पुष्पितैर्नखैः ॥ ५० ॥ अथ पृष्ठिलक्षणं ॥

यतेपुनः ॥८७॥ अथपक्ष्मलक्षणं ॥ पद्मनेत्ररक्षकं भ्रूदेशउपरिउपरिवर्तमानावयवविशेषः ॥ पक्ष्माभिः सुधनैः स्निग्धैः कृ
ष्णैः सूक्ष्मैः सुभाग्यभाक् ॥ कपिलैर्विरलैर्निंद्यासावैभवनिभामिनी ॥८८॥ अथभ्रूलक्षणं ॥ उर्द्धेदृष्यांभ्रुवौस्त्रियामित्यम
रः ॥ भ्रुवौसुवर्तुलेतन्व्यौस्निग्धेकृष्णेअसंहते ॥ प्रशस्तेमृदुरोमाणौसुभ्रुवःकार्मुकाकृती ॥८९॥ खररोमाचपृथुलाविस्तीर्णासरलास्त्रि
यः ॥ नभ्रूप्रशस्तामिलितादीर्घरोमाचपिंगला ॥१९०॥ शिवः ॥ द्वितीयाचंद्रसंकाशांभ्रूयुगंसमनासिका ॥ षड्वांगुलीप्रीतिकरीप
त्युःसंपत्करीमता ॥९१॥ अथकर्णलक्षणं ॥ लंबौकर्णौशुभावार्तौसुखदौचशुभप्रदौ ॥ शष्कुलीरहितौनिंद्यौसिरालौकुटिलौ
कृशौ ॥९२॥ शूर्पकर्णाचनेष्टा ॥ अथभाललक्षणं ॥ भालंललाटं ॥ भालःशिराविरहितोनिर्लोमार्द्धेंदुसंन्निभः ॥ अनिम्न
स्त्र्यंगुलोनार्याःसौभाग्यारोग्यकारणं ॥९३॥ व्यक्तस्वस्तिकरेखंच ललाटंराज्यसंपदं ॥ प्रलंबमलकंयस्याःदेवरंहंतिसाध्रुवं ॥९४॥
रोमशेनशिरालेनप्रांशुनारोगिणीमता ॥ विलासे ॥ अतिसंकीर्णविषमदीर्घरोमशभालिका ॥९५॥ अंगुलत्रितयादूनाधिकभाल
स्थलापिच ॥ भालेनखंडरेखेणरेखाहीनेननिंदिता ॥९६॥ यस्याःत्रीणिप्रलंबानिललाटमुदरंभगः ॥ सापिमारयतेत्रीणिस्वसुरं
देवरंपतिं ॥९७॥ अथसिमंतमौलिलक्षणं ॥ सिमंतश्चसिंदुराधारकेशावेशविस्तारविशेषः मौलिश्चशिरः ॥ सीमंतःसर
लःशस्तोमौलिश्शस्तःसमुन्नतः ॥ राजकुंभनिवृत्तश्चसौभाग्याश्चर्यसूचकः ॥९८॥ स्थूलमूर्द्धाचविधवादीर्घशीर्षाचबंधकी ॥ वि
शालेनापिशिरसाभवेद्दौर्भाग्यभंजनं ॥९९॥ अथकेशलक्षणं ॥ केशाःमौलिजाः ॥ केशाअलिकुलछायाःसूक्ष्मास्निग्धासु
कोमलाः ॥ किंचिदाकुंचिताग्राश्चकुटिलाश्चातिशोभनाः ॥२००॥ परुषाःस्फुटिताग्राश्चविरलाश्चशिरोरुहाः ॥ पिंगलारघवोरुक्षा
दुःखदारिद्रबंधदाः ॥१॥ शिवः ॥ स्थूलकेशापनिश्चीस्यान्दीर्घकेशाधनप्रदा ॥ परुषैःकपिलैःक्रूरास्कंधकेशात्वशोभना ॥२॥
अथस्वरलक्षणं ॥ हंसस्वरामेघवर्णायानारीदीर्घलोचना ॥ यस्याग्रहेसमागछेत्तद्गृहंपुण्यभाजनं ॥३॥ हंसक्रौंचस्वरानारीतथासधु
पकोकिला ॥ चक्रवाकस्वरायासाहंमधान्यविवर्द्धिनी ॥४॥ तीक्ष्णस्वराऽतिगभीरस्वरातिमधुरस्वरा ॥ अष्टौसाजनयेत्पुत्रान्धनधा

न्यसमन्विता॥ ५॥ अथगतिलक्षणं ॥ यस्याः गमनमात्रेणभूमिकंपः प्रजायते ॥ रजोत्थानेनसानारीकुलद्वयविनाशिनी ॥ ६ ॥
कंपनौचरणौयस्याः खर्वौवाभवतौयदि ॥ धन्यधान्यविहीनायादुःखदारिद्रदायिनी ॥ ७ ॥ मृदंगी मृगजंघाच मृगाक्षीच मृगोदरी ॥ हंस
गत्यासमानारीराजपत्नीविनिर्दिशेत्॥ ८ ॥ अथवर्णलक्षणं ॥ कृष्णाश्यामाचयानारीगौरीचंपकसत्प्रभा॥ स्निग्धाचंद्रमुखीयावै
सानारीलभतेसुखं॥ ९ ॥ अथरोमावर्तलक्षणं ॥ स्कंदः ॥ पाणौप्रदक्षिणावर्तौधर्म्योवामोनशोभनः ॥ नाभौश्रुतावुरसिवादक्षि
णावर्तइडितः ॥ १० ॥ सुखायदक्षिणावर्तः पृष्टवंशास्यदक्षिणे ॥ पृष्टमध्येनाभिसमोबव्हायुःपुत्रवर्द्धनं ॥ ११ ॥ राजपत्न्याप्रदृश्येतभग
मौलौप्रदक्षिणः॥ सचेच्छकटतुल्यश्चेद्दव्हापत्यादुःखप्रदा॥ १२॥ कटिगोगुह्यवेधेनपत्यपत्यनिपातनः॥ स्यातामुरवरवेघेनपृयावर्तौन
शोभनौ॥ १३॥ एकेनहंतिभर्तारंभवेदन्येनपुंश्चली॥ कंठगोदक्षिणावर्तोदुःखवैधव्यहेतुकं॥ १४॥ सीमंतंथललाटेवात्याज्योदूराप्रय
त्नतः॥ सापतिंहंतिवर्षेणयस्यामध्येकृकाटिका॥ १५॥ प्रदक्षिणोवावामोवारोम्णामावर्तकस्त्रियः॥ एकोवामूर्द्धनियौवावामेवामंगना
अपि॥ १६॥ आदशाहंपतिघ्नौतौत्याज्यौदूरात्सुबुद्धिना॥ १७॥ कटयावर्तिचकुलटानाभ्यावर्तापतिव्रता॥ पृष्टावर्ताचभर्तृघ्नीकुल
टाचापिजायते॥ १८॥ शिवः ॥ त्रयोवर्ताश्चदृश्यंतेललाटेउदरेभगे॥ भक्षयेत्साक्षणान्नूनंदेवरंस्वसुरंपतिं॥ १९॥ अथशरीरां
गेषुमशातिलकादिलक्षणं ॥ स्कंदः॥ भ्रुवोरंतर्ललाटेवामशकोराज्यसूचकः॥ वामेकपोलेमशकः शोणोमिष्टान्नदंस्त्रियः॥ २०॥
तिलकंलांछनंचापिकृदिसौभाग्यकारणं॥ यस्यादक्षिणवक्षोजेशोणेतिलकंलांछने॥ २१॥ कन्याचतुष्टयंसूतेसूतेसाचसुत
त्रयं॥ तिलकंलांछनंशोणेयस्यावामेकुचेभवेत्॥ २२॥ एकंपुत्रंप्रसूयादौततःसाविधवाभवेत्॥ गुह्यस्यदक्षिणेभागेतिलकं
यदियोषितः ॥ २३॥ तदाक्षितिपतेःपत्नीसूतेवाक्षितिपंसुतं॥ नासाग्रेमशकः शोणोमहिष्यायेवजायते॥ २४॥ कृष्णः सएवभ
र्तृघ्न्याः पुंश्चल्याश्चप्रकीर्तितः॥ नाभेरधस्तात्तिलकं शकोलांछनंशुभं॥ २५॥ मशाकस्तिलकंचिन्हंगुल्फदेशेदरिद्रकृत्॥ कर्णे
करेकपोलेवाकंठेवामेभवेद्यदि॥ २६॥ एषांत्रयाणामेकंतुप्राग्गर्भपुत्रदंभवेत्॥ भालगेनत्रिशूलेननिर्मितनस्वयंभुवा॥ २७॥ नितं


बिनीसहस्त्राणांस्वामित्वंयोषिदाप्नुयात्॥ शिवः ॥ ललाटेकृष्णतिलकेपंचसाजनयेत्सुतान्॥२८॥ यस्याश्चहृसमानायाः
ललाटेस्वस्तिकोभवेत्॥ वामनानांसहस्त्रस्य आधिपत्यंविनिर्दिशेत्॥२९॥ अथस्वप्नायांदंतघर्षणप्रलपनफलं ॥ स्कंदः॥
सुप्तापरस्परंयातुदंतान्‌किटकिटायते॥ सुलक्ष्यापिनसाशस्तायत्किंचित्प्रलपेत्तथा॥३०॥ अथस्नेहत्वलक्षणं ॥ हृद्रोमनस्तने
शेषुदंतोष्ठनयपेषुच॥ स्नेहोत्रविद्यतेयासांसामताशुभकारिणी॥३१॥ अथस्त्रीणांदुष्टलक्षणानि ॥ विलासे ॥उत्कटस्त्र
युदुर्दर्शाकपिलद्युतिधारिणी॥ अतिश्यामातिगौरीचसातिस्थूलातितन्विना॥३२॥ अतिदीर्घाचहृस्वाचविषमांगाधिकांगि
का॥ हीनांगाशोचविकलारुक्षकर्कशकांगिका॥३३॥ संचरिष्णुरुगाघ्राताधर्मनिद्वेषिणीतथा॥ धर्मांतररताचापिनीचकर्म
रतापिच॥३४॥ अजीवत्प्रसवास्तोक प्रसवास्वसृमातृका॥ रसवत्यादिविज्ञानरहितेदृकुमारिका॥३५॥ कुशीलादुर्भगावंध्याद
रिद्रादुःखिताधमा॥ अल्पायुर्विधवाकन्यास्यादेभिर्दुष्टलक्षणैः॥३६॥ अथपद्मिन्यादिस्त्रीणांसंक्षेपेणलक्षणं ॥ पद्मिनी
चित्रिणीचैवशांखिनीहस्तिनीतथा॥ तत्रदृष्टिविधानेनवक्तव्यास्त्रीविचक्षणैः॥३७॥ पद्मिनीबहुकेशाचस्वल्पकेशाचहस्ति
नी॥ शांखिनीदीर्घकेशाचवक्रकेशाचचित्रिणी॥३८॥ चक्रहस्तौचपद्मिन्याः चित्रिणीचसमस्तनी॥ हस्तिनीऊर्ध्वकेशाच
स्थूलकेशाचशांखिनी॥३९॥ पद्मिनीदंतशोभाढयादंतोन्नताश्चहस्तिनी॥ शांखिनीदीर्घदंताचसमदंताचचित्रिणी॥४०॥ पद्मि
नीपद्मगंधाचमधुगंधाचहस्तिनी॥ शांखिनीक्षारगंधाचमत्सगंधाचचित्रिणी॥४१॥ हंसस्वरश्चपद्मिन्याः गूढशब्दाचहस्तिनी
॥ रुक्षशब्दश्चशांखिन्याकाकशब्दाचचित्रिणी॥४२॥ पूर्वश्लोकोक्तगंधपरिक्षास्थानंतुपृष्टवंशस्योपरिज्ञेयंयंकृकाटिकां
वदंतितत्कृकाटिकामध्येगंधपरिक्षा ॥ पंकजासनलयेनपद्मिनीवेणुदारितपदेनशांखिनी॥ स्कंधपादयुगलेनहस्तिनीना
गरेणरमयंतिचित्रिणी॥४३॥ पद्मिनीमुखसौरभ्यंउरसौरभ्यहस्तिनी॥ चित्रिणीकटिसौभाग्यंपादसौभाग्यशांखिनी॥४४॥ पद्मि
नीवांछतेप्रेमंद्रव्यंवांछतिहस्तिनी॥ चित्रिण्यामानमिच्छंतिक्लेशंवांछतिशांखिनी॥४५॥ अथस्त्रीणांषोडशशुभलक्षणानि


(उदर)
नाभि
वक्षस
स्तन
भुज
कूर्पर
कर
मणिबंध
उरु
जानु
जंघा
गुल्फ
पार्ष्णि
अंस
जत्रु
नेत्र



अथपादचिन्हस्वरूपं
अथसर्वतोभद्रचक्रम्


भाला
खड्ग
धनुष
शून्य
शक्ति
मातृरेखा
आयुरेखा
पितृरेखा
धनरेखा
मातृरेखा
विद्यारेखा
देहरेखा
धनुरेखा
छत्र
नळद्वानावरीयव
चित्ररेखा
ध्वज
देवालय
कनोरेखा
महाकरेखा
रथ
बान
कमल
यूप
संतानरेखा
दस्तछत्र
स्वस्तिक
समचतुरस्र
घट
तराजू
घंटा
गजकंठ
अश्व
प्रासाद
अंकुश
कुंडल
भूषण
गज
चंद्र
शंख
सूर्य
योनि
पालखी
कंकण
गदा
पर्वत
नेत्र
स्वस्तिक


डमरु

शृंगाराणि ॥आदौमज्जनचारुचीरतिलकंनेत्रांजनंकुण्डलंनासामौक्तिकपुष्पहारकुरलंझंकारकंनूपुरं। अंगेचंदनलेपकंचुकमणि
क्षुद्रावलिघण्टिकाताम्बूलंकरकंकणंचतुरतास्त्रीणामिमेषोडश २४६ इतिश्रीहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कं
धेसामुद्रिकलक्षणाध्यायेस्त्रीलक्षणनिरूपणंनामप्रकरणंचतुर्थं ४ ॥ ॥अथसमष्टिमिश्रप्रकरणंपंचमम् ॥ ॥तत्रहस्तत्रिरेखा
निरूपणं ॥यन्नामधेयंसकलार्त्तिभंजनंयत्कीर्त्तनंवैकलिकल्मषघ्नं । योवैरसानांयशसांस्वरूपोदेवःसपायात्करुणानिधिर्नः ॥१॥
यंदेवदेवंमुनिसिद्धसंघाःस्तुवंतिगायंतिचसामगीतैः । तंवंद्यआद्येशशिलेखचूडाविराजितंशंभुमुमार्धदेहं ॥२॥ यज्जातकंव्यास
पराशराख्यश्रीसूर्यकात्यायनछागलेयैः। कृतंतदेवाद्यमहंब्रवीमियुक्तंसुसामुद्रिकयुक्तभेदैः ॥३॥ अथपाणिस्थितत्रिरेखा
विचारः ॥रेखावशात्कुत्रचजन्मकालेज्ञानंतथातत्फलसाधनंच । वक्ष्येशिवंभूमिधरेन्द्रकन्याप्रियंनमस्कृत्यगुरुंस्वकंच ॥ ४॥त
त्राथवक्ष्यामिकरांतरालेरेखागणानांकिलनामसंज्ञा । याभिःफलंवासरजन्मवेलासंजातज्ञानंविबुधावदंति ॥५॥ अंगुष्ठमूलस्थि
तेरेखिकायाःसंज्ञांबुधाःप्राहुरथाधगूढां । यस्याःपरांव्याघ्रविलाससलीलांततःपरांशीलगुणस्वरूपां ॥६॥ रेखाप्रगूढायदिपूर्णदेहे
नसंश्रितावाथदिरेखिकाभिः । तामेवप्राहुर्विबुधास्तदानींसंगूढदेहांचविगूढदेहां ॥७॥ श्लिष्टायदासायदिवामभागेमध्यप्रदेशे
स्वसमानकाभिः ।क्रमेणगौरीचरमांनदंतीतामेवसामुद्रिकजातकज्ञाः ॥८॥ समानजातीयसमानदेशेगुष्ठस्यविश्रामप्रदेशभागेमु
खंस्मृतंतत्परमत्रपादप्रदेशभागंगदितंमुनींद्रैः ॥९॥ रेखाप्रगूढायदिपादवेशेसंयुक्तदेहाकिलरेखयाच ।तदाप्रदिष्टापरगूढदेहासु
खस्थलेचापिनिगूढदेहा ॥१०॥संगूढदेहाचनिगूढदेहाप्रोगंसदाप्नोतितदातिलक्ष्मीः । गौरीरमायोगमथापितद्वत्संज्ञांसमाप्नोतिमु
निप्रदिष्टां ॥११॥ निगूढदेहापरगूढदेहायोगंतदावैप्रवदंतिधीराः । सुरूपदांजातकशालिनोऽपिसामुद्रिकास्तासुखभोगदात्रीं ॥१
२॥ खण्डदेहाकम्पदेहारेखाप्रासाक्रमेणच । कुबुद्धिकारिणीचायसौख्यसर्वविनाशिनी ॥१३॥ तिलसंयुक्तवदनातिलसंयुक्तपादका
रेखाप्रगूढनाम्नीवैसंस्मृताजगरेखिका ॥ १४॥ इतिप्रथमरेखाभेदविचारः ॥अथप्रवक्ष्यामिततोद्वितीयांरेखांसदाव्याघ्रविला

सलीलां । प्रगूढरेखाक्रमभागभेदमाश्रित्यनामानिफलानिचाग्रे ॥१५॥ रेखायदाव्याघ्रविलासनाम्नीसम्पूर्णदेहागदितातदासौ । मृगी
गतिःश्लिष्टवपुश्चनागीवाराहिकाश्लिष्टतनुर्यमांगे॥ १६॥ वामप्रदेशेयदिसंश्रितासासुभद्रदेहागदितासुधीभिः । पादप्रदेशेकुमुरवी-
निरुक्तामुखस्थलेकृष्णकचाप्रदिष्टा ॥१७॥ मृगीगतिर्भुजंगमप्रियासुयोगमाप्नुयात् । तदायुधैर्निगद्यतेसदाचसैवपांसुला॥१८॥ वा
राहिकापाश्वसुभद्रदेहायोगेविराट्भूतिरसौनिरुक्ता। योगेथप्रोक्ताकुमुखीसुनीलशिरोरुहायाविबुधैरनंता ॥१९॥ मुखेतुखण्डारव
कुपादखण्डामध्येचखण्डागदिताक्रमेण । वसुंधराक्षांतिमतीसुशीलवतीचयोगेतिस्रणांनिकृष्टा ॥२०॥तिलेनसंयुक्तमुखीसरोज
वतीतिलप्रोक्तपदातुरंगी । तिलेनसंश्लिष्टसमप्रदेशेमातंगिकासांयुजिसार्वभौमी ॥२१॥ इतिद्वितीयरेखाभेदविचारः॥ अथ
तृतीयरेखाभेदविचारः ॥रेखायदाशीलगुणस्वरूपांसम्पूर्णदेहाजगतीनिरूपिता ।संश्लिष्टदेहाकथिताकुमारीधृतिर्निरुक्ताच
यमांगमिश्रा ॥२२॥ वामांगभागेयदिरेखिकाभिः संश्लिष्टमूर्त्तिरमणीमथैव ।पादस्थलेसात्रिपदीनिरुक्तामुखस्यदेशेखलुवासवीसा
॥२३॥ जगतीकुमार्योयोगेकथिताशीलगुणस्वरूपरेखा ।विश्वदेवीतिकथिताविबुधैःसामुद्रिकजातकज्ञैः ॥२४॥गांधारीतितुत्रि
पदीवायव्यांयोगपंचकामाला ।वदनप्रवेशउदरेपादेखण्डेचशीलगुणरूपा ॥२५॥ दारिद्रदाकुग्रहिणीचपलचदनासैवास्यात्।
तिलकांकितवदनावातिलसंयुक्तमध्यप्रदेशावा ॥२६॥ तदासौशीलगुणस्वरूपानिगदितासामुद्रिकजातकविद्भिः॥ सेनानीत्वप्र
दात्रीमहाराज्यप्रदा चासांयोगेसांराज्यप्रदारेखा ॥२७॥ प्रगूढरेखात्वथव्याघ्रविलासलीलांतथातथाशीलगुणस्वरूपा ॥आ
सांप्रभेदानिसमासतोवैज्ञेयानिविद्वद्भिरिमानिनूनं ॥२८॥ ॥इतिसुधाकरेप्रथमाध्यायः॥ ॥अथत्रिरेखायाःशाकादिविचारः
॥ जातकसुधाकरेप्रथमावतंसे ॥ उपाधिगम्योप्यनुपाधिगम्योसमाधिगम्योप्यवलोक्यमानः ॥प्रचोऽपिभूयादभवायदेवः
शिवोऽपिपापायादपिनःसपायात्॥१॥ प्रगूढरेखायाःप्रोक्तास्तस्याःशाकस्तथागरुत् ॥ मासोन्याघ्रविकासिन्यास्तिथिरित्युक्तु
शात्यतः ॥ ३०॥ आसामुत्तममध्यमाधमधामभेदविभागश्च ॥ ज्ञातव्यंखलुसर्वैर्यथाहिवचनंदेवदेवस्य ॥३१॥ अथासांरे

रवाणां सिद्धांकान्याह ॥ सम्पूर्णमूर्त्तेश्च भगूढकायानवेषुजैवातृकवह्नि २१५९ तुल्याः ॥ हीनश्चरेखाभ्रखेषुधैः १५०० स्त-
दास्याच्छाकः पुराभूतमुनेर्मतंच ॥३२॥ संगूढदेहारव्यकरेखिकायाः दशेन्दुचन्द्राणि १११० न्युदाहृतानि ॥ योज्यानि खेदाब्धि-
शरोन्मितानि ५४१ शाकः समायातिजनस्यनूनम् ॥३३॥ विगूढसंज्ञरेखायाः खाभ्राभ्राक्षि २००० समाः स्मृताः ॥ हीनाश्चन्द्राग्नि
रामैः ३३१ श्चजन्मकालशाकोभवेत् ॥३४॥ तस्याएवरवीन्दुभानि २७११२ गदितान्यंकानिरामाब्धिवेदस्तत्वानि २५४४३ विहीन-
तानिगदितः शाकोनृणांनिश्चयात् ॥ तान्यंकानि हि विदितानिजलधिक्ष्माभृन्नगाभ्याक्षिभिः २३७७४ स्याच्छाकः किलगौतमे
नगदितंसत्यंजनस्यापिच ॥३५॥ गौर्याः पंचगुणेन्दुकर्णप्रमितान्यंकानि २१३५ नेत्रांगवेदाख्यैः ४६२ हीनितमानिजन्मसमये
शाकः प्रदिष्टोबुधैः ॥ दिग्रुद्राणिच १११० संयुतानिममषद्बाणैस्तथापूर्ववच्छाकैः संभवतीतिगार्ग्यगदितंसत्यंनृणांवास्तुच ॥३
६॥ रमायाः खखाभ्राक्षि २००० संख्यानिहस्तमरुद्राम ३५२ हीनानिशाकोजनस्य ॥ इमान्येव ३५२ युक्तानिषट्खेदसूर्यैः १
२९६ जनुःशाककालोमतंकाश्यपस्य ॥ ३७॥ रमासंज्ञकायो धृतिर्भ्रञ्चतुल्याः १२१८ प्रयोज्याब्धिसप्ताब्धिभिः ४७४ शाकएव
॥ खखाभ्राणियोज्यानि ००० नेत्रांकभूपैः १६९२ शाकोजन्मकाले मुनेगौतिमस्य ॥३८॥ प्रगूढदेहरेखायाः खाभ्रेन्दुगुणकानिच ३
१०० ॥ हेयानिनागवेदाब्धिचन्द्र १४४८ जन्मशकः स्मृतः ॥ ३९॥ अस्याएवधृतिर्ग्रहैश्च १९८ नियुतान्यंकानिवेदाग्निभूभृतिः ॥
७३४ सूतिशाकोबुधैर्निगदितोनुव्याघ्रपात्सृष्टकैः ॥ विंशाक्षोणिपसंज्ञकानि १६२० चयुतान्यंकानिदंतै ३२ स्तदा शाकः संभवतीति व्यासगदि
तंद्रोयंबुधेर्जातके ॥ ४०॥ निगूढदेहरेखायाः पंचपंचसमीरणैः ५५५ ॥ युतानिनेत्रकर्णेन्दुचन्द्राणिच ११२ शाकोभवेत् ॥ ४१॥ भानि
२७ युक्तानिखाभ्रेषुचंद्रै १५०० र्भूयोयुतानिच ॥ खबाणेन्दु १५० समैः शाकोजनुःसमयजोभवेत् ॥४२॥ अतिलक्ष्मीसंज्ञिकायाअं
कान्यत्रखखाभ्रय: ३००० ॥ हीनाश्चनववेदाग्निचन्द्रै १३४९ र्जन्मशाकोभवेत् ॥४३॥ एकवृध्याचतेब्देव ३०००१ हीनान्येतानिवे-
१३४९ तया ॥ जन्मकालशाकः प्रोक्तो इतिगार्ग्यमुनिर्मतं ॥ ४४ ॥ चतुर्वृध्या ३०००४ त्रिवृध्याच ३०००३ हीनान्येतानि १३४९ तेषु-